महादेवशास्त्रिग्रन्थमाला - २०

सनाद्यन्तधातुपाठः

पुष्पादीक्षितविरचितः

संस्कृतभारती

नवदेहली

सनाद्यन्तधातुपाठः

पुष्पादीक्षितविरचितः

संस्कृतभारती
नवदेहली

प्रकाशनम् -
२५, दीनदयाल उपाध्यायमार्गः
तिलकब्रिज्रेल्वेस्थानकसमीपे
नवदेहली - ११० ००२

© प्रकाशकस्य एव

प्रथमं मुद्रणम् - २०११ - १०००
द्वितीयं मुद्रणम् - २०२० - १०००

मूल्यम् - रू० ६०/-

मुद्रणम् -
वागर्थ
हनुमन्तनगरम्, बेङ्गलूरु - १९

ISBN - 978-93-81160-13-8

SANADYANTADHATUPATHAH (सनाद्यन्तधातुपाठः) - A book for Sanadyanta Verb roots enumerated by Panini, compiled by Pushpa Dikshit. Publisher - **SAMSKRITA BHARATI**, 25, Deendayal Upadhyay Marg, Nr Tilk Bridge Railway Station, New Delhi - 110 002, Ph - 011-23236711/23236722, Email-samskritamdelhi@gmail.com

Pages - v + 174 Price - Rs. 90/- Second Print - Feb - 2020

Printed at - **VAGARTHA,** Hanumanthanagara, Bangalore - 19

विवक्षितम्

अनन्तो वर्तते शब्दराशिर्लौकिको, वैदिकश्च । तस्य प्रतिपत्तौ प्रतिपदपाठमनभ्युपायं मत्वा भगवता पाणिनिना यत्सामान्यविशेषवल्लक्षणं कृतम्, तदेवाष्टाध्यायी । अत्र सर्वो लौकिको, वैदिकश्च शब्दराशिर्भगवता भागद्वये विभाजितः । अजन्ताः शब्दाः, हलन्ताश्च । अजन्तानां कृतेऽन्त्यमचमाश्रित्य कार्याणि प्रोक्तानि । यथा - अतो गुणे । अतो भिस ऐस् । अतोऽम् । अतो येयः । अतो लोपः । अतो हेः, इत्यादीन्यदन्तानां कृते । आतोऽनुपसर्गे कः । आतश्चोपसर्गे । आतो युच् । आतो मनिन्-क्वनिब्-वनिपश्च । आतो लोप इटि च । आतो युक् चिण्कृतोः, इत्येतानि सूत्राण्याकारान्तानां कृते । एरच् । एरनेकाचोऽसंयोगपूर्वस्य, इतीकारान्तानां कृते । उतश्च प्रत्ययादसंयोगपूर्वात् । उतो वृद्धिर्लुकि हलि । ओर्गुणः । ओः सुपि । इत्यादीन्युकारान्तानां कृते । अचि श्नुधातुभ्रुवां य्वोरियङुवङौ, इतीकारान्तानामुकारान्तानां च कृते । घिसंज्ञामुद्दिश्यापि सर्वं कार्यमिकारान्तामुकारान्तानां च कृते । नदीसंज्ञामुद्दिश्य सर्वमीकारान्तानामूकारान्तानां च कृते । ऋदृशोऽङि गुणः । ऋतश्च संयोगादेर्गुणः । ऋद्धनोः स्ये । ऋतश्च । ऋदुशनस्पुरुदंसोऽनेहसां च, इत्यादीनि ऋकारान्तानां कृते । ॠत इद्धातोः । उदोष्ठ्यपूर्वस्य, इति ॠकारान्तानां कृते ।

किन्तु हलन्तशब्दानां कृते सामान्यं शास्त्रमन्त्यक्रमेण न प्रवर्तते । तच्च हलन्तेषूपधाक्रमेण प्रवर्तते । यथा - पोरदुपधात् । अतो ल्रान्तस्य । अतो हलादेर्लघोः । अत उपधायाः । अत एकहल्मध्येऽनादेशादेर्लिटि, इत्यादीनि सूत्राणि - अदुपधानां कृते सन्ति । रलो व्युपधाद्धलादेः संश्च, इति - इदुपधानाम्, उदुपधानां च कृते । उदुपधाद् भावादिकर्मणोरन्यतरस्याम्, इत्युदुपधानां कृते । ऋदुपधाच्चाक्लृपिचृतेः । रीगृदुपधस्य च । उर्ऋत् । अनुदात्तस्य चर्दुपधस्यान्यतरस्याम्, इत्येतानि सूत्राणि - ऋदुपधानां कृते सन्ति । इगुपधज्ञाप्रीकिरः कः । पुगन्तलघूपधस्य च, इत्यादीनि सूत्राणि - इगुपधानां कृते । इदमेव पाणिनीयशास्त्रस्य सामान्यम् । अत एवैकस्य रामशब्दस्य सिद्धौ सत्यां न वर्तत आवश्यकता कस्यचनान्यस्यादन्तशब्दस्य सिद्धेः । अयमेव सर्वेषां लौकिकानां, वैदिकानां च शब्दानां सिद्धौ लघिष्ठोपायः । इत्थञ्च प्रक्रियादृष्ट्याजन्तधातूनां - १. आकारान्ताः २. इकारान्ताः ३. ईकारान्ताः ४. उकारान्ताः ५. ऊकारान्ताः ६. ऋकारान्ताः ७. ॠकारान्ताः ८. एजन्ताः, इति विभागाः कृताः । अथ च हलन्तधातूनां - ९. अदुपधाः १०. इदुपधाः ११. उदुपधाः १२. ऋदुपधाः १३. शेषधातवः, इति । अनेनैकस्मिन् प्रत्यये परत, एकस्य वर्गस्यैकस्य धातोः सिद्धिर्यथा भवति, तथैव तस्य वर्गस्यान्येषां धातूनां भवति स्वयमेव तस्मिन् प्रत्यये । किन्तु

प्रक्रियाग्रन्थेषु धातूनामिमं क्रममनादृत्य - भू, एध्, बाध् इति धातुपाठक्रमानुसारेणैवैकैकस्य धातोः दश दश लकारा अकारादिक्रमेण साधिताः। तत्र न कृतो विचारलेशोऽप्यस्य पाणिनेः प्रक्रियाविज्ञानस्य। अत एव तिङन्तप्रकरणं महाटवीवद् गहनं समजायत। प्रक्रियाग्रन्था जटिलाः सञ्जाताः, कोषग्रन्थाश्च बृहदाकाराः। अस्मादेव हेतोरेकस्मिन् प्रयोगे कृतभूरि-प्रयत्नस्याप्यन्यस्मिन् प्रयोगे कदापि न हीयते विचिकित्सा। पाणिन्यष्टाध्याय्याः प्रक्रियाविज्ञानमिदमिम्प्रथमतया मयैव प्रकाशितम्।

धातुभ्यो विहिताः प्रत्यया द्विविधाः। सार्वधातुकसंज्ञका, आर्धधातुकसंज्ञकाश्च। लट्, लोट्, लङ्, विधिलिङ्, सिबभावे लेट्, एते पञ्च लकाराः सार्वधातुकसंज्ञकाः सन्ति। कृत्प्रत्ययेषु शतृ, शानच्, चानश्, शानन्, खश्, श, एश्, शध्यै, शध्यैन्, एते नव कृत्प्रत्ययाः सार्वधातुकसंज्ञकाः सन्ति। यदा धातुभ्य सार्वधातुकप्रत्यया विधीयन्ते, तदैव धातुप्रत्यययोर्मध्ये भवन्ति सार्वधातुकप्रत्ययनिमित्तका विकरणाः शबादयः।

लिट्, लुट् लृट्, सिपि लेट्, आशीर्लिङ्, लुङ्, लृङ्, एते सप्त लकाराः, शिद्भिन्नाः सर्वे कृत्प्रत्ययाश्चार्धधातुकसंज्ञकाः सन्ति। यदा धातुभ्य आर्धधातुकप्रत्यया विधीयन्ते, तदा धातुप्रत्यययोर्मध्ये न भवन्त्येते सार्वधातुकप्रत्ययनिमित्तका विकरणाः शबादयः। अयमेव पाणिनीयो विधिः। एकस्मिन् विभागे सार्वधातुकप्रत्ययाः। अपरस्मिन्नार्धधातुकप्रत्ययाः। उभयविधानां सम्मिश्रणं तु सर्वथाऽपाणिनीयमेव।

धातवो द्विविधाः। औपदेशिका, आतिदेशिकाश्च। ये पाणिनिना धातुपाठ उपदिष्टास्त औपदेशिकाः। 'सनाद्यन्ता धातवः ३.१.३२' इति सूत्रेण बोधितसंज्ञकाः द्वादशसनादिप्रत्ययान्ता आतिदेशिकाः। सन्, क्यच् ,काम्यच्, क्यङ्, क्यष्, क्विप्, यङ्, ईयङ्, यक्, आय, णिच्, णिङ्, एते द्वादश प्रत्ययाः सनादयः। अत्र क्विप्प्रत्ययस्तु वार्तिकोक्तः। अन्ये एकादश प्रत्ययाः सूत्रोक्ताः। एते प्रत्यया येषामन्ते भवन्ति, तस्य सनाद्यन्तस्य धातुसंज्ञा भवति, 'सनाद्यन्ता धातवः' इत्यनेन सूत्रेण। एषु सन्, यङ्, ईयङ्, आय, णिङ्, यक् एते प्रत्यया धातुभ्यो भवन्ति। णिच्, णिङ्, एतौ प्रत्ययौ क्वचिद् धातुभ्यः, क्वचिच्च सुबन्तेभ्यो भवतः। क्यच्, काम्यच्, क्यङ्, क्यष्, इमे प्रत्ययाः विविधेष्वर्थेषु सुबन्तेभ्य एव भवन्ति, न धातुभ्यः। तत्र सुपो लुकि प्रातिपदिकमेवावशिष्यते। क्विप्प्रत्ययस्तु प्रातिपदिकभ्यो भवति, न धातुभ्यः।

अस्मिन् ग्रन्थे सर्वेषामौपदेशिधातूनां णिजन्त-सन्नन्त-यङन्त-यङ्लुगन्तधातवो -ऽनेनैव क्रमेण लिखिताः सन्ति। एषां धातूनां दशसु लकारेषु तिङन्तरूपाणि मया

णिजन्तकोशः, सन्नन्तकोशः, यङन्तकोशः, यङ्लुगन्तकोशः, इत्याख्येषु ग्रन्थेषु क्रमेण लिखितानि सन्ति। तिङन्तकोषेषु यत्कार्यं प्रायेण ५००० पृष्ठेषु कृतं, ततोऽप्यधिकं कार्यं मयास्मिन् लघुकाये ग्रन्थे पाणिनेः प्रक्रियाविज्ञानमाश्रित्य कृतम्। अतो भविष्यत्येवायं ग्रन्थो विदुषां मनोमोदायेति प्रत्येमि।

एवं न भवति विश्वस्य कस्यामपि भाषायां, यदेकेन प्रत्ययेन योजितेन निखिलो वाक्यार्थो धातावेवान्तर्निविशेत्। इदमस्ति गीर्वाणवाण्या एव वैलक्ष्यण्यं, यत् सनादिभिः प्रत्ययैर्नवीनो धातुरुत्पद्यते। तस्मात् पुनर्जायते तिङ्कृत्प्रत्ययैर्नूत्ना शब्दसृष्टिरित्यलौकिकमिव प्रतिभाति सर्वमिदम्।

येषां वामाङ्गे निषद्य मयाहर्निशं सेव्यते भगवान् पाणिनिस्तेभ्यः दीक्षितशिवप्रसाद-महाभागेभ्यः कृतिरियं समर्प्यते।

यस्य जगन्नाटकनायकस्य भ्रुकुटिविलासेन सृष्टिलयौ भवतस्तस्यैव कृपाकटाक्षेण कार्यमिदं निष्पन्नमिति तस्यानुग्रहेण कृता कृतिरियमवश्यमेव भविष्यति विदुषां मनोमोदायेति प्रत्येति --

विजयादशमी २०७६ विक्रमाब्दे।
८.१०.२०१९ दिनाङ्के
बिलासपुरम्

पुष्पा दीक्षित

सनाद्यन्तो धातुपाठः

अनुबन्धविज्ञानम्

पाणिनीयशास्त्रमनुबन्धानाश्रित्य, स्वराँश्चाश्रित्य प्रवर्तति। एतयोर्ज्ञानमन्तरा पाणिनीयशास्त्रस्यावगतिर्न भवतीत्ययं सस्वरः सानुनासिकश्च धातुपाठो मया प्रस्तूयते। धातुष्वनुनासिकज्ञानं विनाचामित्संज्ञा न संभवति। अथ च स्वरस्य ज्ञानं विना पदज्ञानं न संभवति, न च सेडनिड्विज्ञानम्। अतः स्वरज्ञानेनैव पदज्ञानं सेडनिड्ज्ञानं च जायते।

अस्मिन् धातुपाठे धातुष्वच उपरि ' ँ ' यदेतादृशं चिह्नं दृश्यते, तत् तस्याचोऽनुनासिकत्वं सूचयति। यथा - ३६९. खनुँ॑ अवदारणे। २५३. डुप॒चँ॑ष् पाके। २६३. भ॒जँ॑ सेवायाम्। २६२. य॒जँ॑ देवपूजासङ्गतिकरणदानेषु। ३६४. म॒न॒ँ ज्ञाने। २५७. शच॒ँ व्यक्तायां वाचि। २५०. व॒चँ परिभाषणे। ५२८. वस॒ँ आच्छादने। १४८०. आस॒ँ उपवेशने। १२२०. एध॒ँ वृद्धौ, इत्यादिषु ' ँ ' अनेन चिह्नेनाङ्कितोऽजनुनासिकः।

धातुष्वचोऽधस्ताद् या रेखा दृश्यते, सा तस्याचोऽनुदात्तत्वं सूचयति। यथा - ५२८. वस॒ँ आच्छादने। १४८०. आस॒ँ उपवेशने। १२२०. एध॒ँ वृद्धौ, इत्यादिष्वधोरेखया -ऽङ्कितोऽजऽनुदात्तः।

धातुष्वच उपरि या रेखा दृश्यते, सा तस्याचः स्वरितत्वं सूचयति। यथा - ३६९. खनुँ॑ अवदारणे। २५३. डुप॒चँ॑ष् पाके। २६३. भ॒जँ॑ सेवायाम्। २६२. य॒जँ॑ देवपूजासङ्गतिकरणदानेषु, इत्यादिषूपरिरेखया.ऽङ्कितोऽच् स्वरितः।

धातुषु यस्याचोऽधस्ताद्, उपरि वा कापि रेखा न दृश्यते, सोऽच् उदात्तो भवति। यथा - ५२८. वस॒ँ आच्छादने, इत्यत्र रेखाचिह्नरहितो वकारोत्तरोऽकार उदात्तः। १४८०. आस॒ँ उपवेशने, इत्यत्र रेखाचिह्नरहित आकार उदात्तः। १२२०. एध॒ँ वृद्धौ, इत्यत्र रेखाचिह्नरहित एकार उदात्तः। ९१२. गृ॒हूँ गर्हणे, इत्यत्र रेखाचिह्नरहितो गकारोत्तर ऋकार उदात्तः। इदमवधेयं यद् धातुष्वनुनासिकोऽजित्संज्ञां प्रयोजयति। उदात्तादयश्च स्वराः पदनिर्णयं विदधतीत्ययं विशेषः।

इत्संज्ञाप्रकरणम्

पाणिनीयशास्त्रे धातवः, प्रत्ययाश्च, यथोपदिष्टास्तथैव न प्रयुज्यन्ते। तत्र ६ ाातुष्वनुबन्धा आसञ्जिताः। यथा - डुकृञ् अयं धातुः। अत्रादौ 'डु', अन्ते 'ञ्', इमावनुबन्धौ। 'कृ' अयं धातुः। एवमेव - टुनदि, ञिमिदा, डुपचष् इत्यादिष्वपि आदावन्ते चानुबन्धौ। बाधृ, अञ्चु, शद्लृ, गम्लृ इत्यादिष्वन्तेऽनुबन्धाः।

प्रत्ययेष्वप्यनुबन्धा आसञ्जिताः। यथा ण्वुल् इत्यत्रादौ 'ण्' अन्ते 'ल्',

इत्यनुबन्धौ। एवमेव ष्वुन्, षाकन्, इत्यादिषु। उपदेशेष्वेतेषामनुबन्धानां विज्ञानं विना शास्त्रस्य प्रवृत्तिरेव न संभवति, अत इत्संज्ञाप्रकरणमुच्यते-

उपदेशेऽजनुनासिक इत् (१.३.२) - उपदेशे योऽनुनासिकोऽच् स इत्संज्ञो भवति। यथा - गम्लृँ - गम्। मदीँ - मद्। अञ्चुँ - अञ्च्। गुपूँ - गुप्। कटेँ - कट्। वदिँ - वद्, इत्यादिष्वनुनासिकस्याच इत्संज्ञा भवति।

येषामित्संज्ञानेन सूत्रेण भवति, तादृशोऽचोऽस्मिन् धातुपाठेऽनुनासिकचिह्नेन निर्दिष्टाः।

हलन्त्यम् (१.३.३) - धात्वादेः समुदायस्य यदन्त्यं हल्, तदित्संज्ञं भवति। यथा - 'डुपचँष्' इत्यत्र 'ष्', 'शीङ्' इत्यत्र 'ङ्' 'शप्' इत्यत्र 'प्', 'श्नम्' इत्यत्र 'म्' 'णिच्' इत्यत्र 'च्' इत्येते इतः।

इर इत्संज्ञा वाच्या (वार्तिकम्) - 'भिदिर्' - भिद्। 'छिदिर्' - छिद्। ईँशुचिर् - शुच्।

३. न विभक्तौ तुस्माः (१.३.४) - 'तिङ्प्रत्ययाः' 'सुप्प्रत्ययाः' एते विभक्तिसंज्ञकाः। विभक्तिस्थाः तवर्गसकारमकारा नेतः। यथा - तस्, थस्, वस्, मस् इत्यत्र सकारस्य इत्संज्ञा न भवति।

४. आदिर्ञिटुडवः (१.३.५) - ञि, टु, डु इत्येतेषां समुदायानामादितो वर्तमानानामित्संज्ञा भवति। यथा - ञिमिदाँ - मिद् / टुनदिँ - नद् / डुकृञ् - कृ। अग्रे त्रीणि सूत्राणि प्रत्ययेष्वेव प्रयुज्यन्ते, न धातुषु।

५. षः प्रत्ययस्य (१.३.६) - प्रत्ययस्यादिः षकार इत्संज्ञो भवति। षाकन् - आक। ष्वुन् - वु। ष्वुञ् - वु।

६. चुटू (१.३.७) - चवर्गः (च्, छ्, ज्, झ्, ञ्) टवर्गश्च (ट्, ठ, ड्, ढ्, ण्) प्रत्ययस्यादी इत्संज्ञौ भवतः। 'जस्' - अस्। 'टा' - आ। ण्वुल् - वु।

७. लशक्वतद्धिते (१.३.८) - तद्धितवर्जितस्य प्रत्ययस्यादितो वर्तमाना ल्-श्-कवर्गाः (क्, ख्, ग्, घ्, ङ्) इत्संज्ञा भवन्ति। यथा - शप् - अ। श्यन् - य। श्ना - ना। शानच् - आन। क्त - त। ख्युन् - यु। ग्स्नु - स्नु। घञ् - अ। ङस् - अस्। ल्युट् - यु।

तस्य लोपः (१.३.९) - यस्येत्संज्ञा, तस्य लोपो भवति।

एतैः सूत्रैः धातुपाठे पठितधातूनामित्संज्ञा विधातव्या। यत्राकारस्येत्संज्ञा भवति, ते धातव आदितः, यथा - ञिमिदाँ, ञिष्विदाँ। यत्र इकारस्येत्संज्ञा, ते इदितः, यथा - वदिँ, मदिँ। यत्र ईकारस्येत्संज्ञा, ते ईदितः, यथा - मदीँ, नृतीँ। यत्र उकारस्येत्संज्ञा, ते उदितः, यथा - ध्वंसुँ, अञ्चुँ। यत्र ऊकारस्येत्संज्ञा, ते ऊदितः, यथा - गुपूँ, अक्षूँ। यत्र

ऋकारस्येत्संज्ञा, ते ऋदितः, यथा - गाधृँ, बाधृँ। यत्र एकारस्येत्संज्ञा, ते एदितः, यथा - कटेँ, रगेँ। यत्र ओकारस्येत्संज्ञा, त ओदितः, यथा - टुओँश्वि, टुओँस्फूर्जाँ। यत्र ङकारस्येत्संज्ञा, ते ङितः, यथा - शीङ्, डीङ्। यत्र ञकारस्येत्संज्ञा, ते ञितः, यथा - भृञ्, हृञ्। यत्र षकारस्येत्संज्ञा, ते षितः, यथा - डुपचँष्, जॄष्, झॄष्। यत्र 'टु' इत्यस्येत्संज्ञा, ते ट्वितः, यथा - टुओँश्वि, टुओँस्फूर्जाँ। यत्र 'डु' इत्यस्येत्संज्ञा ते ड्वितः, यथा - डुपचँष्, डुवपँ। एतैरनुबन्धैरेव शास्त्रप्रवृत्तिर्भवति।

एवमेव प्रत्यया अपि कितः, ङितः, ञितः, णितः षितः, नितः ---। एतैरनुबन्धैरेव शास्त्रप्रवृत्तिर्भवति। अत इमेऽनुबन्धाः सावधानतया स्मर्तव्याः।

धातूनामित्संज्ञानन्तरं तत्रैतेषां चतुर्णां कार्याणां विचारो भवेत्। यत्र प्राप्तिर्भवेदेतेषां, तत्रैतानि कार्याणि भवन्ति।

सत्वादीनि चत्वारि कार्याणि

१. सत्वम् - धातुपाठे येषां धातूनामादौ भवेत् षकारः, तत्र सत्वम्-

धात्वादेः षः सः (६.१.६४.) - धातोरादेः षकारस्य स्थाने सकारादेशो भवति। यथा - ष्वद् = स्वद्। ष्णा = स्ना। ष्ठा = स्था।

सुब्धातुष्ठिवुष्वष्कादीनां सत्वप्रतिषेधो वक्तव्यः (वार्तिकम्) - ष्वष्क, ष्ठिवु, एतयोर्नामधातूनां च षकारस्य स्थाने सकारादेशो न भवति। ष्वष्कते। ष्ठीवति। षण्ढीयते।

२. नत्वम् - धातुपाठे येषां धातूनामादौ भवेद् णकारः, तत्र नत्वम्-

णो नः (६.१.६५) - धातोरादेर्णकारस्य स्थाने नकारादेशो भवति। यथा - णट = नट्। णम् - नम्।

३. नुमागमः- येषां धातूनां इकारस्य इत्संज्ञा भवति, ते 'इदितः'। तत्र नुमागमो भवति -

इदितो नुम् धातोः (७.१.५८) - इदितो धातोर्नुमागमो भवति। यथा - वदि - वद् - वन्द्। - नश्चापदान्तस्य झलि इति नकारस्यानुस्वारे - वंद् - अनुस्वारस्य ययि परसवर्ण इति परसवर्णे - वन्द्। एवमेव - लाछि - लाछ् - लान्छ् - लांछ् - लाञ्छ्। कपि - कप् - कन्प् - कंप् - कम्प्।

४. उपधादीर्घः - उपधायां च (८.२.७८) - येषां धातूनामुपधायां भवेतां रेफवकारौ हल्परौ, ताभ्यां प्राग् वर्तमानस्येको दीर्घः। यथा - कुर्द् - कूर्द् / खुर्द् - खूर्द् / गुर्द् - गूर्द्।

इत्संज्ञानन्तरं येषां धातूनां प्राप्यत एषां मध्ये किमपि कार्यं, तदादौ करणीयम्। अनन्तरं धातुभ्यः प्रत्ययविधानम्।

धातूनां पदनिर्णयविधिः

अस्य सनाद्यन्तधातुपाठस्य चतुर्थे स्तम्भे लिखितं पदं पाणिनीयधातुपाठे पठितस्यौपदेशिकधातोरेवास्ति। न तु सनाद्यन्तानां धातूनाम्।

अत्र प. इत्यनेन परस्मैपदं सूच्यते। आ. इत्यनेन आत्मनेपदं सूच्यते। उ. इत्यनेनोभयपदं सूच्यते।

धातुष्वनुनासिकोऽजित्संज्ञां प्रयोजयति। तस्यानुनासिकस्याचोऽधस्ताद् या रेखा दृश्यते, सा तस्यानुनासिकस्याचोऽनुदात्तत्वं सूचयति। यथा - २५७. शचँ व्यक्तायां वाचि। ५२८. वसँ आच्छादने। १४८०. आसँ उपवेशने। १२२०. एधँ वृद्धौ। एतेषु, एतादृशेषु च धातुषु 'उपदेशेऽजनुनासिक इत्' इत्यनेन सूत्रेण यस्यानुनासिकस्याच इत्संज्ञा भवति, स इत्संज्ञकोऽच् अनुदात्तश्चेत्, स धातुरनुदात्तेदित्युच्यते। तस्मादनुदात्ततो धातोरात्मनेपदं भवति।

अनुदात्तङित आत्मनेपदम् (१.३.१२) - अविशेषेण धातोरात्मनेपदं, परस्मैपदं च विधास्यते। तत्रायं नियमः क्रियते। धातुपाठे ये धातवो अनुदात्तेतो, ङितश्च पठिताः, तेभ्य एवात्मनेपदं भवति, नान्येभ्यः।

यथा - आस् - आस्ते। वस् - वस्ते। एध् - एधते।

धातुमध्ये **'हलन्त्यम्'** इत्यनेन सूत्रेण यस्यान्त्यस्य हल इत्संज्ञा भवति, स इत्संज्ञको हल् ङकारश्चेत् स धातुः 'ङित्' इत्युच्यते। तस्माद् ङितो धातोरात्मनेपदं भवति। यथा - षूङ् - सूते। शीङ् - शेते। डीङ् - डयते। एतदनुसारेण धातुपाठ आत्मनेपदिनां धातूनां रूपाणि 'ते' इति प्रत्ययेन निर्दिष्टानि।

३०८. क्षणुँ हिंसायाम्। ३६९. खनुँ अवदारणे। २५३. डुपचँष् पाके। २६३. भजँ सेवायाम्। २६२. यजँ देवपूजासङ्गतिकरणदानेषु। एतेषु, एतादृशेषु च धातुषु 'उपदेशेऽजनुनासिक इत्' इत्यनेन सूत्रेण यस्यानुनासिकस्याच इत्संज्ञा भवति, स इत्संज्ञकोऽच् स्वरितश्चेत्, स धातुः स्वरितेदित्युच्यते। तस्मात् स्वरितेतो धातोः कर्तृगामिनि क्रियाफल आत्मनेपदं भवति। परगामिनि क्रियाफले परस्मैपदम्।

स्वरितञितः कर्त्रभिप्राये क्रियाफले (१.३.७२) - स्वरितेतो ये धातवो, ञितश्च, तेभ्य आत्मनेपदं भवति, कर्तारि चेत् क्रियाफलमभिप्रैति। परगामिनि क्रियाफले परस्मैपदम्।

कर्तृगामिनि क्रियाफले - यजते। परगामिनि क्रियाफले - यजति। कर्तृगामिनि क्रियाफले - पचते। परगामिनि क्रियाफले - पचति।

धातुमध्ये **'हलन्त्यम्'** इत्यनेन सूत्रेण यस्यान्त्यस्य हल इत्संज्ञा भवति, स इत्संज्ञको हल् ञकारश्चेत् स धातुः 'ञित्' इत्युच्यते। तस्माद् ञितो धातोः कर्तृगामिनि क्रियाफल

आत्मनेपदं भवति। परगामिनि क्रियाफले परस्मैपदम्। यथा - १५५. षुञ् अभिषवे- कर्तृगामिनि क्रियाफले - सुनुते। परगामिनि क्रियाफले - सुनोति। २०१. डुकृञ् करणे - कर्तृगामिनि क्रियाफले - कुरुते। परगामिनि क्रियाफले - करोति।

एतदनुसारेण धातुपाठे उभयपदिनां धातूनां रूपाणि 'ति' 'ते' इत्युभाभ्यां प्रत्ययाभ्यां निर्दिष्टानि।

शेषात्कर्तरि परस्मैपदम् (१.३.७८) - येभ्यो धातुभ्यो येन विशेषणेनात्मनेपदमुक्तं, ततो यदन्यत् स शेषः। शेषात् कर्तरि परस्मैपदं भवति। (ये धातवोऽनुदात्तेतो, ङितः, स्वरितेतो, ञितश्च न सन्ति, तेभ्यो परस्मैपदं भवति)। या - याति। वा - वाति। पठँ - पठति। गम्लृँ - गच्छति।

एतदनुसारेण धातुपाठे परस्मैपदिनां धातूनां रूपाणि 'ति' इति प्रत्ययेन निर्दिष्टानि।

धातूनां सेडनिड्विज्ञानम्

३०८. क्षणुँ हिंसायाम्। ३६९. खनुँ अवदारणे। २५३. डुपचँष् पाके। २६३. भजँ सेवायाम्। २६२. यजँ देवपूजासङ्गतिकरणदानेषु। ३६४. मनँ ज्ञाने। २५७. शचँ व्यक्तायां वाचि। २५०. वचँ परिभाषणे। २५०. वचँ परिभाषणे। ५२८. वसँ आच्छादने। १४८०. आसँ उपवेशने। १२२०. एधँ वृद्धौ।

अत्रावधेयम् - एषु धातुषु द्वावचौ स्तः। द्वयोर्मध्ये योऽच् अनुनासिको भवति, तस्येत्संज्ञा भवति। योऽच् अनुनासिको न भवति, तस्येत्संज्ञा न भवति। यथा - क्षणु इत्यत्र 'क्ष'। खनु इत्यत्र 'ख'। पच इत्यत्र 'प'। मन इत्यत्र 'म'। एध इत्यत्र 'ए'। अननुनासिकत्वादेषामचामित्संज्ञा न भवति।

अनिट्-धातवः - अनुनासिकत्वाभावाद् यस्याच इत्संज्ञा न भवति सोऽच् अनुदात्तश्चेद्, स धातुरनिड् भवति (एकाच उपदेशेऽनुदात्तात्)। यथा - २५३. डुपचँष् पाके। २६३. भजँ सेवायाम्। २६२. यजँ देवपूजासङ्गतिकरणदानेषु। ३६४. मनँ ज्ञाने। २५७. शचँ व्यक्तायां वाचि। २५०. वचँ परिभाषणे। २५०. वचँ परिभाषणे। ५२८. वसँ आच्छादने। १४८०. आसँ उपवेशने। १२२०. एधँ वृद्धौ। इत्यत्रानुनासिकत्वाभावाद् यस्याच इत्संज्ञा न भवति, सोऽनुदात्तः, अत इमे सर्वे धातवोऽनिटः।

सेट्-धातवः - अनुनासिकत्वाभावाद् यस्याच इत्संज्ञा न भवति सोऽच् उदात्तश्चेद्, स धातुः सेड् भवति। यथा - ३०८. क्षणुँ हिंसायाम्। २५७. शचँ व्यक्तायां वाचि। ५२८. वसँ आच्छादने। १४८०. आसँ उपवेशने। १२२०. एधँ वृद्धौ। इत्यत्रानुनासिकत्वाभावाद् यस्याच इत्संज्ञा न भवति, स उदात्तः, अत इमे धातवः सेटः।

इत्थञ्च १२२०. एधँ॒ वृद्धौ, इत्यत्रानुनासिकत्वाद् यस्य धकारोत्तरस्याकारस्येत्संज्ञा भवति, स इत्संज्ञकोऽकारोऽनुदात्तः, अतोऽस्माद् धातोः 'अनुदात्तङित आत्मनेपदम्' इत्यनेनात्मनेपदं भवति। अस्मिन्नेव धातौ अनुनासिकत्वाभावाद् यस्य 'एकारस्य' इत्संज्ञा न भवति, स एकार उदात्तः, अतोऽयं धातुः सेड् भवति।

२५०. व॒चँ परिभाषणे, इत्यत्रानुनासिकत्वाद् यस्य चकारोत्तरस्याकारस्येत्संज्ञा भवति, स इत्संज्ञकोऽकार उदात्तः, अतोऽस्माद् धातोः 'शेषात्कर्तरि परस्मैपदम्' इत्यनेन परस्मैपदं भवति। अस्मिन्नेव धातौ अनुनासिकत्वाभावाद् यस्य वकारोत्तरस्य 'अकारस्य' इत्संज्ञा न भवति, स अकार अनुदात्तः, अतोऽयं धातुरनिड् भवति। एवमेव धातुषु सर्वत्रोह्यम्।

इडागमविषयकं सर्वं मया 'इडागमः' इत्यस्मिन् विशेषेण व्याख्यातम्।

आतिदेशिकधातवः

धातवः सन्ति द्विविधाः। औपदेशिका, आतिदेशिकाश्च। पाणिनीये धातुपाठे पठिता औपदेशिकाः। सनाद्यन्ता आतिदेशिकाः।

अष्टाध्याय्यां 'गुप्-तिज्-किद्भ्यः सन् ३.१.५' इत्यत आरभ्य 'सनाद्यन्ता धातवः ३.१.३२' इत्यन्तैः सूत्रैर्विहिताः सन्, क्यच् ,काम्यच्, क्यङ्, क्यष्, क्विप्, यङ्, ईयङ्, यक्, आय, णिच्, णिङ्, एते द्वादश प्रत्ययाः सनादयः। अत्र क्विप्प्रत्ययस्तु वार्तिकोक्तः। अन्ये एकादश प्रत्ययाः सूत्रोक्ताः।

एते सनादयः प्रत्यया येषामन्ते भवन्ति, ते सनाद्यन्ताः। सनाद्यन्ताः समुदाया धातुसंज्ञका भवन्ति, 'सनाद्यन्ता धातवः' इत्यनेन सूत्रेण।

एषु णिच्, सन्, एतौ प्रत्ययौ सर्वेभ्यो धातुभ्यो भवन्ति। यङ् प्रत्ययो न सर्वेभ्यः। यक् कण्ड्वादिभ्यः। ईयङ्, आय, णिङ्, सूत्रपठितेभ्य एव धातुभ्यः।

णिच्, णिङ्, एतौ प्रत्ययौ क्वचिद् धातुभ्यः, क्वचिच्च सुबन्तेभ्यो भवतः। यथा - 'पुच्छभाण्डचीवराण्णिङ् ३.१.२०' अयं णिङ् प्रत्ययः सुबन्तेभ्यो भवति। किन्तु 'कमेर्णिङ् ३.१.३०' अयं णिङ् प्रत्ययो धातोर्भवति।

'मुण्ड-मिश्र-श्लक्ष्ण-लवण-व्रत-वस्त्र-हल-कल-कृत-तूस्तेभ्यो णिच् ३.१.२१' अयं णिच् प्रत्ययः सुबन्तेभ्यो भवति। किन्तु 'सत्याप-पाश-रूप-वीणा-तूल-श्लोक-सेना-लोम-त्वच-वर्म-वर्ण-चूर्ण-चुरादिभ्यो णिच् ३.१.३०' अयं णिच् प्रत्ययः सत्यापपाशादिभ्यः सुबन्तेभ्यो भवति, अथ च चुरादिभ्यो धातुभ्योऽपि भवति।

क्यच् ,काम्यच्, क्यङ्, क्यष्, इमे प्रत्ययाः विविधेष्वर्थेषु सुबन्तेभ्य एव भवन्ति, न धातुभ्यः। वस्तुतस्तु 'सुप आत्मनः क्यच् ३.१.८' इत्यनेन सूत्रेण इमे प्रत्ययाः सुबन्तेभ्यो विधीयन्ते। किन्तु 'सुपो धातुप्रातिपदिकयोः २.४.७१' इत्यनेन सूत्रेण सुपो लुकि तत्र

प्रातिपदिकेभ्य एव दृश्यन्ते। क्विप्प्रत्ययस्तु प्रातिपदिकभ्यो भवति, न धातुभ्यः।

इत्थञ्च सुबन्तेभ्यः क्यच्, काम्यच्, क्यङ्, क्यष्, क्विप्, णिच्, णिङ्, एते सप्त प्रत्यया भवन्ति। एषु क्यजादिषु प्रत्ययेषु परतः कस्य प्रातिपदिकस्य किं किं भवतीति ग्रन्थान्ते प्रातिपदिकानामकारान्तादिक्रमेण निर्देक्ष्यते।

अस्मिन् धातुपाठे पाणिनीयधातुपाठस्य सर्वे धातवः सन्ति। नैकोऽप्यत्र रिष्यति। किन्त्वत्राजन्तधातवोऽन्त्यवर्णक्रमेण, हलन्तधातवश्चोपधाक्रमेण तथा व्यवस्थापिता, येन वर्णानुक्रमणीं विनापि क्षणमात्रेणैवान्वेष्टुं शक्यन्ते।

अयं सनाद्यन्तो धातुपाठः अष्टसु स्तम्भेषु लिखितो वर्तते।

१. क्रमाङ्कः २. पाणिनीयो धातुः

३. निरनुबन्धो धातुः ४. मूलधातुपाठे धातोः पदम्

५. णिजन्तो धातुः ६. सन्नन्तो धातुः

७. यङन्तो धातुः ८. यङ्लुगन्तो धातुः।

अन्ये ये क्यच्, काम्यच्, क्यङ्, क्यष्, क्विप्, णिच्, णिङ्, प्रत्ययाः सुबन्तेभ्यो भवन्ति, तद्विषयकं सर्वं ग्रन्थान्ते वर्तते।

इदानीमातिदेशिकधातुपाठ आरभ्यते।

अत्र अनिड्धातवः स्थूलाक्षरैः '*दाण् दाने*' एवं तिर्यक्कृत्य लिखिताः। वेड्धातवः स्थूलाक्षरैः '**गाहू विलोडने**' एवं समेन लिखिताः। सर्वे सेड्धातवः अस्थूलाक्षरैः 'श्रिञ् सेवायाम्' एवं समेन लिखिताः। एजन्तधातवस्त्वार्धधातुके प्रत्यये परत आकारान्ता एव भवन्ति, अत आकारान्तैः सह ते समावेशिताः।

आदौ धातूनामकारादिक्रमेण वर्णानुक्रमणी वर्तते। ततो धातोः क्रमाङ्कमुपलभ्य तस्मिन्नेव क्रमाङ्केऽस्मिन्नातिदेशिकधातुपाठमध्ये सनाद्यन्तधातुर्द्रष्टव्यः।

सन्नन्तधातूनां पदनिर्णयः

धातोः कर्मणः समानकर्तृकादिच्छायां वा (३.१.७) - इच्छासमानकर्तृकत्वे सति इच्छाकर्मीभूतो यो व्यापारः तद्वाचकाद् धातोरिच्छायां सन् वा स्यात्। यथा - पठितुम् इच्छति पिपठिषति। अत्र यः कर्ता इषिधातोः, स एव कर्ता इच्छाकर्मीभूतव्यापारस्य पठनस्यापि। अतः इच्छाकर्मीभूतव्यापारवाचकाद् धातोः सन् भवति।

पूर्ववत्सनः (१.३.६२) - यस्य धातोः यत्पदं विहितं पाणिनीये धातुपाठे सनः प्राक्, तस्माद् धातोः सन्प्रत्ययेऽपि तदेव पदं भवति। यथा 'दाण् दाने' अयं धातुपाठे परस्मैपदी।

अतः सन्प्रत्ययेऽप्यस्मात् परस्मैपदिन एव प्रत्यया भवन्ति। दातुमिच्छति दित्सति। 'शीङ् स्वप्ने' अयं धातुपाठ आत्मनेपदी। अतः सन्प्रत्ययेऽप्यस्मादात्मनेपदिन एव प्रत्यया भवन्ति। शयितुमिच्छति शिशयिषते।

णिजन्तधातूनां पदनिर्णयः

हेतुमति च (३.१.२६) - हेतुः स्वतन्त्रस्य कर्तुः प्रयोजकः। तदीयो व्यापारः प्रयोजकव्यापारः प्रेषणादिः। तस्मिन् वाच्ये सर्वेभ्यो धातुभ्यो णिच् प्रत्ययो भवति। यथा -

देवदत्तः पचति, यज्ञदत्तः प्रेरयति, इति यज्ञदत्तः देवदत्तेन पाचयति (पच् + णिच् = पाचि)। देवदत्तः गच्छति, यज्ञदत्तः प्रेरयति, इति यज्ञदत्तः देवदत्तं गमयति (गम् + णिच् = गमि)।

णिचश्च (१.३.७४) - णिजन्तेभ्यो धातुभ्यः कर्त्रभिप्राये क्रियाफले आत्मनेपदं भवति। कटं कारयते। ओदनं पाचयते। परगामिनि क्रियाफले परस्मैपदं भवति। कटं कारयति परस्य। ओदनं पाचयति परस्य।

णेरणौ यत्कर्म णौ चेत्स कर्तानाध्याने (१.३.६७) - अण्यन्तावस्थायां यत् कर्म, तदेव कर्म ण्यन्तावस्थायां कर्ता भवति चेत्, तदा ण्यन्तादात्मनेपदं भवति, परस्मैपदं न भवति, आध्यानं वर्जयित्वा। अणौ - आरोहन्ति हस्तिनं हस्तिपकाः। णौ - आरोहयते हस्ती स्वयमेव। अणौ - हस्तिनं उपसिञ्चन्ति हस्तिपकाः। णौ - उपसेचयते हस्ती स्वयमेव। अणौ - पश्यन्ति भृत्या राजानम्। णौ - दर्शयते राजा स्वयमेव।

निगरणचलनार्थेभ्यश्च (१.३.८७) - निगरणं भोजनम्, अभ्यवहारो वा। चलनं कम्पनम्। निगरणार्थेभ्यश्चलनार्थेभ्यश्च धातुभ्यो ण्यन्तेभ्यः परस्मैपदं भवति। निगरणार्थेभ्यः - निगारयति। आशयति। भोजयति। चलनार्थेभ्यः - चलयति। चोपयति। कम्पयति। अयं योगः सकर्मकार्थः (अदेः प्रतिषेधो व्यक्तव्यः वा.) अत्ति देवदत्तः। आदयते देवदत्तेन।।

अणावकर्मकात् चित्तवत्कर्तृकात् (१.३.८८) - अण्यन्तो यो धातुरकर्मकः, चेतनकर्तृकश्च, तस्माद् ण्यन्तात् परस्मैपदं भवति। आस्ते देवदत्तः। अत्र धातुरकर्मकः, कर्ता च चेतनः। अतोऽस्माद् ण्यन्तादात्मनेपदं न भवति। आस्ते देवदत्तः। आसयति देवदत्तम्। एवमेव - शेते देवदत्तः। शाययति देवदत्तम्।

न पादम्याङ्यमाङ्यसपरिमुहरुचिनृतिवदिवसाम् (१.३.८९) -

पा दमि आङ्यम आङ्यस परिमुह रुचि नृति वद वस इत्येतेभ्यो ण्यन्तेभ्यः परस्मैपदं न भवति। 'णिचश्च' (१.३.७४) इत्यात्मनेपदं भवति।

पूर्वेण योगद्वयेन कर्त्रभिप्रायक्रियाफलविवक्षायामपि यत् परस्मैपदं विहितम्, तस्यैव प्रतिषेधोऽयमुच्यते।

तत्र पिबतिर्निगिरणार्थः दमिप्रभृतयश्चित्तवत्कर्तृकाः। नृतिश्चलनार्थोऽपि। एषां परस्मैपदं न भवति। पा-पाययते। दमि-दमयते। आङ्यम-आयामयते। आङ्यस-आयासयते। परिमुह-परिमोहयते। रुचि-रोचयते। नृति-नर्तयते। वद-वादयते। वस-वासयते।। पादिषु धेट उपसंख्यानम्।। धापयेते शिशुमेकं समीची (ऋ० १.९६.५)।।

यत् अकर्त्रभिप्रायविषयं परस्मैपदम्, तदवस्थितमेव, न प्रतिषिध्यते। वत्सान् पाययति पयः।

यङन्तधातूनां पदनिर्णयः

धातोरेकाचो हलादेः क्रियासमभिहारे यङ् (३.१.२२) - एकाज् यो धातुर्हलादिः क्रियासमभिहारे वर्तते, तस्माद् यङ् प्रत्ययो भवति। अयमेकाज्भ्यो हलादिभ्यो धातुभ्यो भवति। अनेकाज्भ्यो न भवति। अजादिभ्यो न भवति। पौनःपुन्यं, भृशार्थो वा क्रियासमभिहारः।

पुनः पुनः पचति पापच्यते। भृशं ज्वलति जाज्वल्यते। देदीप्यते।

सूचिसूत्रिमूत्र्यटत्यर्त्यशूर्णोतीनां यङ् वक्तव्यम् (वा.) - सूचि, सूत्रि, मूत्रि, एभ्योऽनेकाज्भ्योऽपि भवति। अट्, ऋ, अश्, ऊर्णु, एभ्योऽजादिभ्योऽपि भवति।

नित्यं कौटिल्ये गतौ (३.१.२३) - गतिवचनाद् धातोः कौटिल्ये गम्यमाने नित्यं यङ् प्रत्ययो भवति। चङ्क्रम्यते। दन्द्रम्यते।

लुपसदचरजपजभदहदशगृभ्यो भावगर्हायाम् (३.१.२३) - एभ्यो धातुभ्यो धात्वर्थगर्हायां यङ् प्रत्ययो भवति। गर्हितं लुम्पति लोलुप्यते। गर्हितं सीदति सासद्यते। गर्हितं चरति चञ्चूर्यते।

अनुदात्तङित आत्मनेपदम् (१.३.१२) - अनुदात्तेतो ङितश्च ये धातवस्तेभ्य आत्मनेपदं भवति। यङ्प्रत्ययस्य ङित्त्वात् सर्वेभ्यो यङन्तेभ्यो धातुभ्य आत्मनेपदमेव भवति।

यङ्लुगन्तधातूनां पदनिर्णयः

यङोऽचि च (२.४.७४) - यङोऽच्प्रत्यये लुग् भवति। चकारात् तं विनाऽपि भवति। अतोऽनैमित्तिकोऽयं लुक् सर्वेभ्यो धातुभ्यो विहितस्य यङ्प्रत्ययस्य भवति।

शेषात्कर्तरि परस्मैपदम् (१.३.७८) - येभ्य आत्मनेपदं भवति, ततोऽन्यत्र परस्मैपदं भवति। अतः सर्वेभ्यो यङ्लुगन्तेभ्यः परस्मैपदं भवति। अत्र यङ्प्रत्ययस्य ङित्त्वस्य प्रत्ययाप्रत्ययसाधारणत्वात् प्रत्ययलक्षणाप्रवृत्तेः अनुदात्तेद्भ्यो ङिद्भ्योऽपि यङ्लुगन्तेभ्यः परस्मैपदं भवति।

इदानीमकारादिक्रमेण धातूसूची लिख्यते। येनेष्टधातोरन्वेषणं सुकरं स्यात् ---------------------

धातूनामकाराद्यनुक्रमणी

इदानीमातिदेशिकधातुपाठ आरभ्यते । आदौ धातूनामकारादिक्रमेण वर्णानुक्रमणी वर्तते । इतो धातोः क्रमाङ्कमुपलभ्य तस्मिन्नेव क्रमाङ्केऽस्मिन्नातिदेशिकधातुपाठमध्ये तस्य सनाद्यन्तो धातुरन्वेष्टव्यः । एषां धातूनां दशसु लकारेषु तिङन्तरूपाणि मया णिजन्तकोशः, सन्नन्तकोशः, यङन्तकोशः, यङ्लुगन्तकोशः, इत्याख्येषु ग्रन्थेषु क्रमेण लिखितानि सन्ति ।

अ .

अक २२४
अकि ९१३
अक्षू १४५०
अग २३९
अगद १९३६
अगि ९५८
अघि ९७४
अङ्क १८१५
अङ्ग १८१६
अज २६१
अजि १६०९
अञ्चु १५९७
अञ्चु ९८५
अञ्चु ९८६
अञ्जू १०३५
अट २७४
अट्ट १०८०
अट्ट १८३९
अठि १०९३
अड ३०१
अड्ड ११४४
अण ३०७
अण ३०६
अत ३२५
अति ११५७
अद ३३८
अदि ११७६
अन ३८३
अनोरुध ७५४
अन्ध १८७१
अबि १२६३
अभ्र १३१८
अम ४३१
अम १७३०
अम्बर १९४९
अय ४३२
अरर १९५८
अर्क १८११
अर्च १५९८
अर्च ९८७
अर्ज १०३४
अर्ज १८२५
अर्थ १८६४
अर्द ११७५
अर्द १६३९
अर्ब १२६२
अर्व १३६४
अर्ह १६८०
अर्ह १५०१
अर्ह १९३०
अल ४४९
अव ४७७
अश ४८१
अशू ४८०
अस ५०१
अस ४९९
अंस १९२८
असु ५००
असु १९६२
असु १९६२
असुञ् १९६२
अह ५४०
अहि १६७६
अहि १५००

आ .

आछि १०१२
आप्लृ १६४२
आप्लृ १२५३
आस १४८०

इ .

इक् ८३
इख ५४४
इखि ९४४
इगि ९५९
इङ् ८२
इट ५५६
इण् ८४
इदि ११७८
इन्धी १२१९
इरज् १९६६
इरञ् १९६५
इरस् १९७१
इल ६०४
इल १७७१
इवि १३६२
इष ६३३
इष ६३४
इष ६३५
इषुध १९३९

ई .

ईक्ष १४४८
ईखि ९४५

ईङ् १२०
ईज १०३०
ईड ११४५
ईड १८४६
ईर १३१७
ईर १६५४
ईर्क्ष्य १३०४
ईश १४०९
ईष १४२२
ईष १४२०
ईर्ष्य १३०५
ईह १४९८

उ .

उक्ष १४४९
उख ६६१
उखि ९४६
उङ् १३९
उच ६७४
उछि १०१३
उछि १०१४
उच्छी १०१५
उच्छी १०१६
उज्झ १०७९
उठ ७०६
उध्रस ५०२
उध्रस १५५१
उन्दी ११७७
उब्ज १०३३
उभ ७८५
उम्भ १२८३
उरस् १९७७
उर्द ११७९
उर्वी १३६३
उष ८०३
उषस् १९७२
उहिर् ८३८

ऊ .

ऊन १८७५
ऊयी १३०३
ऊर्ज १८२७
ऊर्णुञ् १२१
ऊष १४२१
ऊह १४९९

ऋ .

ऋ १८८
ऋ १८९
ऋच ८४०
ऋच्छ १०११
ऋज ८४३
ऋजि १०२९
ऋणु ८५७
ऋधु ८७२
ऋधु ८७३
ऋफ ८८५
ऋम्फ १२५४
ऋषी ९०५

ॠ .

ॠ २२३

ए .

एजृ १०३१
एजृ १०३२
एठ १०९२
एध १२२०
एला १९५५
एषृ १४२३

ओ .

ओखृ ९४३
ओणृ ११४६
ओलडि १६१८

क .

कक २३१
ककि ९२१
कख २३३
कखे २३२
कगे २४६
कच २६०
कचि १०००
कटी २७७
कटे २७६
कठ २९९
कठि १६१५
कठि १०९६
कड ३०३
कड ३०५
कडि १११७
कडि १६२०
कड्ड १११४
कण ३१९
कण ३१४
कण १७१२
कण्डूञ् १९६३
कत्र १६५१
कथ १७१९
कत्थ ११७१
कदि ११८७
कदि १२१०
कनी ३७१
कपि १२४१
कबृ ३९८
कमु ४१९
कर्ज १०५९
कर्ण १८९१
कर्त १६४६
कर्द १२०७
कर्ब १२७९
कर्व १३९३
कल ४७६
कल १७४१
कल १७४२
कल्ल १३५९
कष ४९५
कस ५२०
कसि १४८५
काक्षि १४६२
काचि १००१
काशृ १४१२

काशृ	१४११
कासृ	१४८७
कि	७६
किट	५५७
किट	५५८
कित	५६८
किल	६०८
कीट	१८३०
कील	१३४७
कु	१५१
कुक	६६०
कुङ्	१२२
कुङ्	१४१
कुच	६७१
कुच	६७२
कुच	६७३
कुजु	६७७
कुञ्च	९९०
कुट	६९१
कुट्ट	१८३५
कुट्ट	१८३६
कुठि	११००
कुड	७१३
कुडि	११०५
कुडि	११२३
कुडि	१६२१
कुण	७२९
कुण	१७८४
कुत्स	१९२५
कुथ	७३५
कुथि	११५९
कुद्रि	१९०३
कुन्थ	११६६
कुप	७६४
कुप	१५६५
कुबि	१२६९
कुबि	१६४७
कुमार	१८९४
कुर	७९२
कुर्द	११९३
कुल	७९९
कुस	८२६
कुशि	१६६२
कुष	८२२
कुषुभ	१९४०
कुसि	१६६८
कुस्म	१८८९
कुह	१७९५
कूज	१०५४
कूट	१८४१
कूट	१८४२
कूण	१८५१
कूण	१८५४
कूल	१३४८
कृञ्	२००
कृञ्	२०१
कृड	८५२
कृती	८६५
कृती	८६६
कृप	१७९८
कृप	१८८९
कृपू	८७९
कृवि	१३७५
कृश	८९३
कृष	९०३
कृष	९०४
कॄ	२१८
कॄ	२२१
कॄञ्	२११
कॄत	१८५९
केत	१८६३
केपृ	१२४७
केला	१९५६
केलृ	१३३३
कै	३०
क्नसु	५१७
क्नूञ्	१६९
क्नूयी	१३१५
क्मर	४४७
क्रथ	३३७
क्रदि	१२११
क्रदि	११८८
क्रन्द	१८६८
क्रप	३९०
क्रमु	४२०
क्रीञ्	१००
क्रीडृ	११३३
क्रुञ्च	९९८
क्रुड	७२२
क्रुध	७४८
क्रुश	८०१
क्लथ	३३६
क्लदि	१२१२
क्लदि	११८९
क्लमु	४१६
क्लिदि	११९२
क्लिदि	१२१७
क्लिदू	५७७
क्लिश	६२९
क्लिशू	६२७
क्लीबृ	१२६४
क्लेश	१४१०
क्वण	३१५
क्वथे	३२९
क्षजि	१०६५
क्षणु	३०८
क्षपि	१६४५
क्षमू	४१५
क्षमूष्	४१८
क्षर	४४८
क्षल	१७३८
क्षि	६९
क्षि	७०
क्षि	६९
क्षिणु	५६७
क्षिप	५९४
क्षिप	५९५
क्षिप	१७६७
क्षिवु	६१९
क्षीज	१०५३

क्षीबृ १२६५
क्षीष् ९७
क्षु १३६
क्षुदिर् ७४१
क्षुध ७४९
क्षुभ ७७८
क्षुभ ७७७
क्षुभ ७८२
क्षुर ७९४
क्षेवु १३८१
क्षोट १८४४
क्षै ४१
क्ष्णु १३७
क्ष्मायी १३१२
क्ष्मील १३४३
क्ष्विदा ५७४
क्ष्वेलृ १३३५

ख.

खच २५२
खज २७०
खजि १०४४
खट २९२
खट्ट १८३२
खड १७०९
खडि १११८
खडि १६१९
खद ३४७
खनु ३६९
खर्ज १०६०
खर्द १२०८
खर्ब १२७८
खर्व १३९४
खल्ल १३५३
खल ४६९
खष ४९६
खादृ १२१८
खिट ५५९
खिद ५८३
खिद ५८४
खिद ५८५
खुजु ६७८
खुडि १६२३
खुर ७९१
खुर्द ११९४
खेट १८४३
खेला १९५७
खेलृ १३३४
खै २६
खोर्ऋ १३२१
खोलृ १३३९
ख्या ६३

ग.

गज २७१
गज १६९५
गजि १०४९
गड ३०४
गडि ११०७
गडि ११०८
गण १७१३
गद ३५७
गद १७२०
गद्गद १९३५
गन्ध १८७२
गम्लृ ४०६
गर्ज १०५७
गर्द १२०५
गर्ब १२७९
गर्व १३९५
गर्व १६५७
गर्ह १५०८
गर्ह १६८२
गल ४७०
गल १७४६
गल्भ १२९८
गल्ह १५१२
गवेष १९१४
गा १२
गाङ् ११
गाधृ १२२९
गाहू १५१८
गु १२४
गुङ् १४०
गुज ६८१
गुजि १०४०
गुड ७१८
गुडि १६२२
गुण १७८५
गुद ७३८
गुध ७४५
गुध ७४६
गुप ७५६
गुप ७६५
गुप १५६४
गुपू ७५७
गुफ ७७२
गुम्फ १२६१
गुरी १३२६
गुर्द ११९५
गुर्द १८६५
गुर्वी १३८७
गुहू ८३७
गूर १८९६
गूरी ७८६
गृ १८१
गृ १६८८
गृज ८४५
गृजि १०५०
गृधु ८७४
गृह १८०१
गृहू ९१२
गॄ २१९
गॄ २२२
गेपृ १२४८
गेवृ १४०३
गेषृ १४३७
गै १३
गोम १८८७
गोष्ट १०८४
ग्लसु ५२७
ग्लह ५३८

ग्लुचु	२४७
ग्लुञ्चु	९९६
ग्लेपृ	१२४५
ग्लेपृ	१२४९
ग्लेवृ	१४०४
ग्लै	४२
ग्रथि	११७०
ग्रन्थ	११६५
ग्रन्थ	१६३३
ग्रन्थ	१६३४
ग्रस	१५५२
ग्रसु	५२६
ग्रह	५३९
ग्राम	१८८५
ग्रुचु	६६८
घ .	
घघ	२४७
घट	२७५
घट	१५३४
घट	१६९९
घट्ट	१०८१
घट्ट	१८३१
घटि	१६११
घस्लृ	५०३
घिणि	११५३
घुङ्	१४२
घुट	६८८
घुट	७००
घुण	७२३
घुण	७२४
घुणि	११५४
घुर	७९५
घुषि	१४३४
घुषिर्	१५६८
घुषिर्	८१०
घूर्ण	११५१
घूर्ण	११५६
घूरी	१३२७
घृ	१६८९
घृ	१८३
घृ	१८२
घृणि	११५५
घृणु	८६२
घृषु	८९९
घ्रा	५६
ङ .	
ङुङ्	१४३
च .	
चक	२२७
चक	२३०
चक्क	१८०६
चकासृ	१४९५
चक्षिङ्	१४७९
चञ्चु	९९१
चट	१६९८
चडि	१११३
चण	३२१
चते	३२७
चदि	१२१३
चदे	३५५
चप	३९२
चपि	१६४४
चमु	४२५
चमु	४२३
चय	४३७
चर	४४५
चर	१७३७
चरण	१९४२
चर्करीतं	१५२०
चर्च	१००८
चर्च	१००९
चर्व	१३९१
चर्ब	१२८२
चर्च	१८१९
चल	४५२
चल	४५३
चल	१७४४
चष	४८७
चह	१७५६
चह	१७६०
चह	५३७
चायृ	१३१०
चि	१५२२
चिञ्	१५२१
चिञ्	८८
चिट	५६२
चित	१७६३
चिति	१६३१
चिती	५६९
चित्र	१६५२
चिरि	९०
चिल	६०९
चिल्ल	१३५४
चीक	१५८७
चीभृ	१२९४
चीव	१६५६
चीवृ	१३९८
चुक्क	१८०७
चुट	६९८
चुट	१७७७
चुट्ट	१८३८
चुटि	१६१३
चुड	७२०
चुडि	११०६
चुड्ड	११४२
चुद	१७८६
चुप	७६२
चुबि	१२७२
चुबि	१६४६
चुर	१७८९
चुरण	१९४४
चुल	१७९३
चुल्ल	१३५५
चूरी	१३३०
चूर्ण	१८४८
चूर्ण	१८४९
चूष	१४२४
चृती	८६७
चेलृ	१३३२
चेष्ट	१०८३

च्यु १६८५
च्युङ् १४४
च्युतिर् ७३०

छ.

छजि १६०७
छद १५४२
छद १७२१
छदि १६३८
छमु ४२१
छर्द १८६९
छष ४८९
छिदिर् ५८०
छिद्र १६५८
छुट ६९९
छुप ७५९
छुर् ७८७
छृदिर् ८६९
छृदी १५७३
छेद १८७०
छो १९

ज .

जक्ष १४५८
जज २६७
जजि १०४७
जट २८७
जन ३६८
जनी ३६७
जप ३९१
जभि १६५०
जभी ४०१
जमु ४२३
जर्ज १०६१
जर्ज १०६२
जल ४५४
जल १७४०
जल्प १२३९
जष ४९४
जसि १६७१
जसु ५०४
जसु १५४९
जसु १५५०
जागृ १९०
जि ७४
जि ७५
जि १५२३
जिरि ९१
जिवि १३७३
जिषु ६३८
जीव १३८०
जुगि ९७१
जुड १७८३
जुड ७११
जुड ७१२
जुतृ ७३३
जुष १५६६
जुषी ८२३
जूरी १३२८
जूष १४३२
जृभि १२९२
जॄ २१६
जॄ १५३२
जॄष् २१५
जेषृ १४३९
जेहृ १५१७
जै २७
ज्ञप १७२७
ज्ञा ६५
ज्ञा १६८४
ज्या ३९
ज्युङ् १४५
ज्रि ७२
ज्रि १५२४
ज्वर ४४४
ज्वल ४६५

झ .

झट २९०
झमु ४२२
झर्झ १०७७
झर्झ १०७८
झष ४९०
झष ४९१
झॄष् २१७

ट .

टकि १५८८
टल ४६१
टिकृ ५४१
टीकृ ९२६
ट्वल ४६२

ड .

डप १७२९
डिप ५९९
डिप ६००
डिप १७६५
डिप १७६६
डीङ् ११२
डीङ् ११३
डुपचष् २५३
डुलभष् ४००

ढ .

ढौकृ ९३५

ण.

णक्ष १४५६
णख २३६
णखि ९५०
णट २८०
णट २८१
णद ३४६
णद १५४०
णभ ४०३
णभ ४०४
णभ ४०५
णम ४०७
णय ४३९
णल ४५५
णश ४८२
णस ५२५
णह ५३४
णासृ १४८९
णिक्ष १४५९
णिजि १०६६

णिजिर्	५५१
णिदि	१२१६
णिदृ	५८८
णिल	६१२
णिवि	१३६९
णिश	६३१
णिसि	१४८६
णीञ्	१०७
णीव	१३७९
णु	१३३
णुद	७४०
णुद	७४३
णू	१५९
णेदृ	११८२
णेषृ	१४४०
ष्णिह्	१७६५
त .	
तक	२२६
तकि	९१४
तक्ष	१४५२
तक्षू	१४५१
तगि	९६४
तञ्चु	९९२
तञ्चू	९९७
तट	२८८
तड	१५३७
तड	१७०८
तडि	१११५
तत्रि	१९०१
तनु	३६५
तनु	१५४५
तन्तस्	१९७३
तप	३८५
तप	३८९
तप	१५४६
तमु	४१२
तय	४३८
तरण	१९४१
तर्क	१५८४
तर्ज	१०५८
तर्ज	१८२६
तर्द	१२०६
तल	१७३९
तसि	१६७२
तसु	५०५
तायृ	१३११
तिक	५४३
तिकृ	५४२
तिग	५४६
तिज	५५५
तिज	१७६१
तिपृ	५९७
तिम	६०२
तिल	६०६
तिरस्	१९७६
तिल	६०७
तिल	१७७०
तीकृ	९२७
तीव	१३७८
तीर	१८९२
तुज	६७९
तुजि	१०४८
तुजि	१६०४
तुजि	१६०५
तुट	६९७
तुड	७१५
तुडि	११२५
तुडृ	७१०
तुण	७२५
तुत्थ	१६३६
तुद	७३९
तुप	७६०
तुप	७६३
तुफ	७६९
तुफ	७७१
तुबि	१२७१
तुबि	१६४९
तुभ	७७५
तुभ	७७९
तुभ	७८४
तुम्प	१२३५
तुम्प	१२३६
तुम्फ	१२५६
तुम्फ	१२६०
तुर	७८९
तुरण	१९४५
तुर्वी	१३८३
तुल	१७९०
तुष	८०५
तुस	८२७
तुहिर्	८३१
तूण	१८५२
तूरी	१३२४
तूल	१३५०
तूष	१४२५
त्रक्ष	१४५४
तृणु	८६१
तृदिर्	८७०
तृप	८८३
तृप	८८१
तृप	१५७६
तृम्फ	१२५८
तृषा	८९५
तृह	९०८
तृहू	९०९
तृंहू	१५०२
तॄ	२१४
तेज	१०५५
तेपृ	१२४३
तेवृ	१४००
त्यज	२६४
त्रकि	९२४
त्रदि	१२०९
त्रपूष्	३९६
त्रस	१७५२
त्रसि	१६६६
त्रसी	५१५
त्रुट	६९६
त्रुट	१७८०
त्रुप	७६१

त्रुफ ७७०
त्रुम्प १२३७
त्रुम्फ १२५७
त्रैङ् ५५
त्रौकृ ९३६
त्वच २५४
त्वगि ९६९
त्वञ्चु ९९३
त्वरा ४४३
त्विष ६५२
त्सर ४४६
त्वक्षू १४७०

थ.

थुड ७१६
थुर्वी १३८४

द .

दक्ष १४७२
दक्ष १४७१
दघ २४९
दण्ड १६१६
दद ३५१
दध ३६१
दमु ४१३
दम्भु १२८४
दय ४३२
दरिद्रा ३७
दल ४५९
दल १५४७
दंश १४१६
दशि १६६१
दशि १६६०
दसि १६७५
दसि १६६९
दसु ५०६
दह ५३०
दाञ् १
दाण् २
दान १२३२
दाप् ३२
दाशृ १४१८
दाशृ १४१९
दासृ १४९२
दिवि १३७१
दिवु ६२१
दिवु १५५५
दिवु १५५६
दिश ६२३
दिह ६५६
दीक्ष १४७६
दीङ १०८
दीधीङ् ११८
दीपी १२४२
दु १५३
दु १३०
दुःख १८१४
दुःख १९३२
दुर्वी १३८५
दुल १७९१
दुष ८०६
दुह ८२९
दुहिर् ८३०
दूङ् १६५
दृ १८५
दृङ् १९४
दृप ८८२
दृप ८८४
दृभ १५७८
दृभी ८८७
दृभी १५७७
दृम्फ १२५९
दृशिर् ८९०
दृह ९०६
दृहि १५०४
दॄ २१३
देङ् ३
देवृ १४०१
दैप् ३१
दो ४
द्यु १५४
द्युत ७३४
द्यै ४४
द्रम ४३०
द्रवस् १९७५
द्रा ५०
द्राक्षि १४६५
द्राखृ ९५४
द्राघृ ९८३
द्राडृ ११२७
द्राहृ १५१५
द्रु १२६
द्रुण ७२६
द्रुह ८३४
द्रूञ् १६७
द्रेकृ ९२८
द्रै ४८
द्विष ६४५

ध.

धक्क १८०५
धन ३७९
धवि १३६६
धाञ् ६
धावु १३९९
धि ८१
धिक्ष १४७३
धिवि १३७२
धिष ६४३
धीङ् ११०
धुक्ष १४७७
धुञ् १३२
धुर्वी १३८६
धू १६०
धूञ् १५२९
धूञ १७०
धूप १२३४
धूप १६४३
धूरी १३२५
धूस १९२२
धृङ् १९१
धृङ् १९२
धृज ८४४

धृजि	१०४२
धृञ्	१९७
धृष	१५८०
धृषा	९०१
धेक्	९२९
धेट्	५
धोर्ऋ	१३२२
ध्मा	५१
ध्यै	६१
ध्रज	२६८
ध्रजि	१०४१
ध्रण	३८०
ध्राक्षि	१४६६
ध्राखृ	९५५
ध्राड्	११२८
ध्रु	१२९
ध्रु	१२३
ध्रेक	१८१७
ध्रै	५९
ध्वज	२६९
ध्वजि	१०४३
ध्वण	३१८
ध्वन	३७८
ध्वन	१७२५
ध्रस	५०२
ध्वंसु	१४८२
ध्वाक्षि	१४६७
ध्वृ	१७४
न.	
नक्क	१८०४
नट	१५३६
नट	१६९७
नदि	१२१४
नल	१५४८
नर्द	१२०४
नस	१७५३
नाथृ	११७३
नाधृ	१२२७
निवास	१९२७
निष्क	१८१३
नील	१३४५
नृती	८६४
नॄ	२२०
प.	
पक्ष	१९१७
पचि	१००४
पचि	१५९५
पट	२८२
पट	१५३५
पट	१७००
पठ	२९४
पडि	१११६
पडि	१६२६
पण	३२४
पत	१५३८
पत्लृ	३२८
पथि	१६३२
पथे	३३०
पद	३५०
पद	१७२२
पन	३८२
पम्पस्	१९७४
पयस्	१९७८
पय	४३५
पर्ण	१६३०
पर्द	११९६
पर्प	१२३८
पर्ब	१२७३
पर्व	१३८८
पल	४५६
पल्यूल	१९१०
पश	१७४८
पष	१७५०
पसि	१६७४
पा	१६
पा	२१
पार	१८९१
पाल	१९०६
पि	८०
पिच्छ	१८२२
पिजि	१६०१
पिजि	१६०६
पिजि	१०६८
पिट	५६५
पिठ	५६६
पिडि	१६२७
पिवि	१३६७
पिडि	११२०
पिश	६३२
पिष्लृ	६४९
पिस	१७७३
पिसि	१६६७
पिसृ	६५३
पीङ्	१०५
पीड	१८४७
पील	१३४४
पीव	१३७६
पुट	६९४
पुट	१५६०
पुट	१७८१
पुटि	१६१२
पुट्ट्	१८३७
पुड	७१४
पुण	७२७
पुथ	७३६
पुथ	१५६३
पुथि	११६०
पुर	७९६
पुल	७९८
पुल	१७९२
पुष	८०७
पुष	८११
पुष	८१३
पुष	१५६७
पुष्प	१२४०
पुस्त	१८५६

पुंस	१९२१
पूङ्	१६४
पूज	१८२३
पूञ्	१६६
पूयी	१३१४
पूरी	१६५५
पूरी	१३२३
पूल	१३५१
पूल	१९०४
पूर्व	१३९७
पूष	१४२६
पृ	१८४
पृङ्	१९३
पृच	१५६९
पृची	८४१
पृची	८४२
पृड	८५५
पृण	८५८
पृथ	१७९७
पृषु	८९६
पॄ	२०८
पॄ	२०९
पॄ	१५३१
पेलृ	१३३६
पेवृ	१४०५
पेषृ	१४३८
पेसृ	१४९३
पै	२०
पैणृ	११४७
प्यायी	१३१६
प्यैङ्	५३
प्रच्छ	१०१७
प्रथ	३३३
प्रथ	१७१७
प्रस	५२४
प्रा	५२
प्रीङ्	९२
प्रीञ्	१०१
प्रीञ्	१५२५
प्रुङ्	१४६
प्रुड	७०८
प्रुष	८१५
प्रुषु	८१६
प्रेषृ	१४४१
प्रोथृ	११७४
प्लिह	६५९
प्ली	९९
प्लुङ्	१४७
प्लुष	८०९
प्लुष	८१७
प्लुष	८१८
प्लुष	८१९
प्सा	६४
	फ.
फक्क	९४०
फण	३०९
फल	४५१
फला	४५०
फुल्ल	१३५६
फेलृ	१३३७
	ब.
बख	२३४
बद	३४४
बध	३५८
बध	१७२४
बन्ध	१२२२
बर्ब	१२७५
बर्ह	१५०९
बर्ह	१९२९
बर्ह	१६८२
बल	४५७
बल	१७४३
बहि	१५०६
बल्ह	१५११
बल्ह	१६८३
बस्त	१८६०
बाडृ	११२६
बाधृ	१२२८
बिट	५६३
बिदि	१२१५
बिल	६११
बिल	१७६९
बिस	६५४
बुक्क	१८०३
बुक्क	९४१
बुगि	९७२
बुध	७४७
बुध	७५२
बाहृ	१५१४
बुधिर्	७४४
बुन्दिर्	११८०
बुस	८२४
बुस्त	१८५७
बृह	९०७
बृहि	१५०५
बृहि	१६७७
ब्रूञ्	१५८
ब्रूस	१९२३
ब्ली	९८
	भ.
भक्ष	१९१९
भज	२६३
भज	१६९६
भजि	१६०३
भञ्जो	१०३८
भट	२७९
भट	२९१
भडि	१११२
भडि	१६२५
भण	३१३
भदि	११८४
भर्व	१३९२
भर्त्स	१९२४
भल	४७५
भल	१७४७
भल्ल	१३६१

भष	४९८	भ्रक्ष	१४६८	मठि	१०९५	मस्जो	१०६४
भस	५२१	भ्रण	३१७	मडि	११११	मह	५३६
भा	३४	भ्रमु	४१०	मडि	११०९	मह	१७५८
भाज	१८२८	भ्रमु	४१७	मडि	१६२४	महि	१५०७
भाम	१२९९	भ्रंशु	१४८३	मण	३११	महि	१६७८
भाम	१८८३	भ्रस्ज	१०७६	मत्रि	१९०२	महीङ्	१९५८
भाष	१४३६	भ्रंशु	१४१७	मथि	११६२	मा	७
भासृ	१४८८	भ्राजृ	१०७३	मथे	३३१	माक्षि	१४६४
भिक्ष	१४७५	भ्राजृ	१०७२	मद	१७२३	माङ्	९
भिदिर्	५७९	भ्राशृ	१४१४	मदि	११८५	माङ्	१०
भिषज्	१९६७	भ्री	९६	मदी	३४३	मान	१२३१
भिष्णज्	१९६८	भ्रूण	१८५३	मन	३६४	मान	१६४१
भी	११५	भ्रेजृ	१०७१	मनु	३६३	मान	१८७४
भुज	६८३	भ्रेषृ	१४४६	मन्थ	११६३	मार्ग	१५८९
भुजो	६७६	भेषृ	१४४५	मन्थ	११६४	मार्ज	१८२४
भुवो	१६८६	भ्लक्ष	१४६९	मन्तु	१९६०	माहृ	१५१९
भुरण	१९४६	भ्लाशृ	१४१५	मभ्र	१३२०	मिच्छ	१०२४
भू	१७२	भ्लेषृ	१४४७	मय	४३६	मिजि	१६००
भू	१५२८		म.	मर्च	१८१९	मिञ्	८९
भूष	१४३३	मकि	९२०	मर्ब	१२७६	मिदा	५७३
भूष	१९१२	मख	२३५	मर्व	१३९०	मिदा	५७५
भृजी	८५०	मखि	९४८	मल	४७२	मिदि	१६३७
भृञ्	१९८	मगध	१९३८	मल्ल	१३६०	मिदृ	५८९
भृञ्	१९९	मगि	९६३	मव	४७८	मिल	६०५
भृशि	१६६३	मघि	९७५	मव्य	१३०६	मिल	६१४
भृशु	८९१	मघि	९७९	मष	४९२	मिष	६४०
भॄ	२०६	मच	२५८	मश	४८३	मिषु	६३९
भेषृ	१४४५	मचि	१००३	मस्क	९३९	मिवि	१३६८
भ्यस	५२९	मठ	२९५	मसी	५०७	मिश	६३०

मिश्र	१६५९	मूङ्	१६१	म्रुचु	६६६	युञ्	१५७
मिह	६५८	मूत्र	१६५३	म्रुञ्चु	९९४	युतृ	७३२
मी	१५२७	मूल	१३५२	म्रेडृ	११३७	युध	७५३
मीङ्	१०९	मूल	१९०४	म्लुचु	६६७	युप	७६६
मीञ्	११७	मूष	१४२७	म्लुञ्चु	९९५	यूष	१४३१
मीमृ	१३०२	मृक्ष	१४६०	म्लेच्छ	१०२८	यौटृ	१०९१
मील	१३४०	मृग	१७९६	म्लेच्छ	१८२१		र.
मीव	१३७७	मृङ्	१९५	म्लेटृ	१०८९	रक	१६९०
मुच	१७७६	मृजू	८४७	म्लेवृ	१४०७	रक्ष	१४५३
मुच्लृ	६६२	मृड	८५४	म्लै	४३	रख	२३७
मुचि	१००२	मृड	८५६		य.	रखि	९४९
मुज	६८०	मृड	८५३	यक्ष	१९१८	रगि	९६०
मुजि	१०५१	मृण	८६०	यज	२६२	रगे	२४१
मुट	६९५	मृद	८७१	यत	१७१५	रघि	९७६
मुट	१७७८	मृधु	८७८	यती	३२६	रघि	१५९२
मुड	७०७	मृश	८८९	यत्रि	१९००	रच	१६९२
मुठि	१०९७	मृष	९०२	यभ	४०२	रञ्ज	१०३६
मुडि	११२४	मृष	१५७९	यम	१७३३	रञ्ज	१०३७
मुडि	११३२	मृषु	८९८	यम	४०८	रट	२८३
मुण	७२८	मृ	२०७	यसु	५०८	रठ	२९६
मुद	७३७	मेङ्	८	या	३३	रण	३१०
मुद	१७८७	मेदृ	११८१	याचृ	१००५	रण	३२३
मुर	७९३	मेधृ	१२२६	यु	१३४	रद	३४५
मुर्छा	१०२२	मेधा	१९५४	यु	१६८७	रध	३६०
मुर्वी	१३८२	मेपृ	१२५०	युगि	९७०	रप	३९४
मुष	८२१	मेवृ	१४०६	युच्छ	१०२५	रफ	३९७
मुस	८२५	म्ना	६०	युज	६८२	रफि	१२५५
मुस्त	१८५५	म्रक्ष	१९२०	युज	१५५९	रबि	१२६६
मुह	८३५	म्रद	३५३	युजिर्	६८४	रभ	३९९

रमु	४०९
रय	४४०
रवि	१३६५
रस	५१३
रस	१७५४
रह	५३५
रह	१७५७
रह	१७५९
रहि	१५०३
रहि	१६७९
रा	३६
राखृ	९५२
राघृ	९८१
राजृ	१०७४
राध	१२२४
राधो	१२२३
रासृ	१४९०
रि	७८
रि	७९
रिगि	९६७
रिच	१५५४
रिचिर्	५४९
रिफ	६०१
रिवि	१३७४
रिश	६२५
रिष	६३७
रिष	६४७
री	१०३
रीङ्	१०४
रु	१३५
रुङ्	१४८
रुच	६६४
रुज	१५५८
रुजो	६७५
रुट	६८६
रुट	१५६२
रुटि	१०८७
रुठ	७०२
रुठि	११०४
रुदिर्	७४२
रुधिर्	७५१
रुप	७६७
रुश	८०२
रुशि	१६६४
रुष	८१२
रुष	८१४
रुष	१७९४
रुसि	१६७०
रुह	८३३
रूक्ष	१६६५
रूप	१८७७
रूष	१४२९
रेकृ	९३०
रेखा	१९५२
रेटृ	१०८६
रेपृ	१२५१
रेभृ	१२९५
रेवृ	१४०८
रेषृ	१४४२
रै	२५
रोडृ	११३९
रौडृ	११४१
ल.	
लक्ष	१९१५
लक्ष	१९१६
लख	२३८
लखि	९५१
लग	१६९१
लग	१६८२
लगि	९६१
लगे	२४०
लघि	९७७
लघि	१५९१
लघि	१५९३
लछ	१०२६
लज	१६९३
लज	२६६
लजि	१६०८
लजि	१०४५
लजी	२६५
लट	२८४
लड	३०२
लड	१७१०
लडि	१६१९
लडि	१६२८
लप	३९५
लबि	१२६७
लबि	१२६८
लभष्	३९९
लर्ब	१२७४
लल	१७४५
लष	४८८
लस	५१४
लस	१७५१
लस्जी	१०७०
ला	३५
लाखृ	९५३
लाघृ	९८२
लाछि	१०१८
लाज	१०५२
लाजि	१०४६
लाट	१९३४
लाभ	१८८२
लिख	५४५
लिगि	९६८
लिगि	१५९०
लिट	१९३३
लिप	५९६
लिश	६२४
लिश	६२८
लिह	६५७
ली	११४
ली	१५२६
लीङ्	१११
लुजि	१६०२
लुट	६८७

लुट	६९२
लुट	६९०
लुट	१५६१
लुठ	७०१
लुठ	७०३
लुठ	७०४
लुटि	१०८८
लुठि	११०१
लुठि	११०२
लुण्ठ	१८४५
लुञ्च्	९८८
लुथि	११६१
लुप	७६८
लुप्लृ	७५८
लुबि	१२७०
लुबि	१६४८
लुभ	७८०
लुभ	७८३
लूञ्	१६८
लूष	१९१३
लूष	१४२८
लेखा	१९५१
लेपृ	१२५२
लेट्	१९६९
लेला	१९५३
लोकृ	९३३
लोकृ	१५८३
लोचृ	१००६
लोचृ	१५९४
लोट्	१९७०
लोडृ	११४०
लोष्ट	१०८५
व.	
वकि	९२२
वकि	९१९
वक्ष	१४५७
वखि	९४७
वगि	९६२
वघि	९७८
वच	२५०
वच	१५३३
वज	२७२
वञ्चु	९८९
वञ्चु	१५९६
वट	२७८
वट	२८९
वट	१७०१
वट	१७०२
वटि	१६१०
वठ	२९८
वठि	१०९४
वडि	१११०
वण	३१२
वद	३४८
वद	१५४४
वदि	११८३
वन	३७५
वन	३६६
वन	३७६
वनु	३६२
वनु	३७७
वप	३८६
वभ्र	१३१९
वम	४२९
वय	४३४
वर	१७३५
वरण	१९४३
वर्च	१००७
वर्ण	१६२९
वर्ण	१८५०
वर्ध	१८७३
वर्ष	१४३५
वर्ह	१५१०
वल	४७४
वल्क	१८०९
वल्क	१५८१
वल्ग	९७३
वल्भ	१२९७
वल्गु	१९६१
वल्ल	१३५८
वल्ह	१५१३
वश	४८५
वष	४९७
वस्क्	९३८
वस	५१०
वस	५२८
वस	१७५५
वसु	५०९
वह	५३१
वा	२३
वाक्षि	१४६३
वाछि	१०१९
वात	१८६१
वाश्रृ	१४१३
वास	१९२६
विचिर्	५५०
विच्छ	१०२३
विच्छ	१५९९
विजिर्	५५२
विजी	५५३
विजी	५५४
विट	५६४
विथृ	५७१
विद	५८१
विद	५८६
विद	५८७
विद	१७६४
विद्लृ	५७८
विध	५९१
विल	६१०
विल	१७६८
विश	६२६
विष	६४२
विषु	६४६
विष्क	१५८२
विष्क	१८१२

विष्ल्ट	६५०	वेल	१९०९	शट	२८५	शान	१२३३
वी	११६	वेलृ	१३३१	शठ	२९७	शासु	१४९१
वीर	१८९८	वेल्ल	१३५७	शठ	१७०७	शासु	१४९४
वृक	८३९	वेवीङ्	११९	शठ	१७०५	शिक्ष	१४७४
वृक्ष	१४७८	वेष्ट	१०८२	शठ	१७०३	शिखि	९५७
वृङ्	२०३	वेहृ	१५१६	शडि	१११४	शिघि	९८०
वृजी	८४६	वै	२२	शण	३२२	शिजि	१०६७
वृजी	८५१	व्यच	२५१	शद्लृ	३४१	शिञ्	८७
वृजी	१५७०	व्यध	३५९	शद्लृ	३४२	शिट	५६०
वृञ्	२०२	व्यथ	३३२	शप	३८७	शिल	६१५
वृञ्	२०४	व्यय	४४१	शप	३८८	शिष	६३६
वृञ्	१५३०	व्यय	१७३४	शब्द	१८६६	शिष	१५५७
वृण	८५९	व्युष	८२१	शम	१७३१	शिष्ल्ट	६४८
वृतु	८६३	व्युष	८०८	शमु	४११	शीक	१५८५
वृतु	८६८	व्येञ्	४०	शर्ब	१२८०	शीक	१५८६
वृतु	१५७२	व्रज	२७३	शर्व	१३९६	शीकृ	९२५
वृधु	८७५	व्रज	१६९४	शल	४६०	शीङ्	१०६
वृधु	१५७५	व्रण	३१६	शल	४७३	शीभृ	१२९३
वृश	८९२	व्रण	१७१४	शम्ब	१८८०	शील	१९०८
वृष	१८००	व्रश्चू	१०१०	शल्भ	१२९६	शील	१३४६
वृषु	८९७	व्री	९५	शव	४७९	शुच	६७०
वृहू	९१०	व्रीङ्	९३	शर्व	१३९६	शुचिर्	६६३
वॄ	२०५	व्रीड	११३४	शश	४८४	शुच्य	१३०७
वेञ्	२४	व्रुड	७२१	शष	४९३	शुठ	७०५
वेणृ	११५२		शा.	शसि	१४८४	शुठ	१७८२
वञ्चु	९८९	शक	२२९	शशु	१४९७	शुठि	११०३
वेथृ	११७२	शकि	९१८	शसु	५११	शुठि	१६१४
वेद	१९३७	शक्लृ	२२५	शाखृ	९५६	शुध	७५०
वेपृ	१२४६	शच	२५७	शाडृ	११२९	शुन	७५५

शुन्ध १२२१
शुन्ध १६४०
शुभ ७७३
शुभ ७७६
शुभ ७८१
शुम्भ १२८५
शुम्भ १२८६
शुल्क १८१०
शुल्ब १८८१
शुष ८०४
शूर १८९७
शूरी १३२९
शूर्प १८७८
शूल १३४९
शूष १४३०
शृधु ८७६
शृधु ८७७
शृधु १५७४
शॄ २१२
शेलृ १३३८
शै २९
शो १७
शोणृ ११४८
शौटृ १०९०
श्चुतिर् ७३१
श्मील १३४१
श्यैङ् ५४
श्रकि ९१६
श्रगि ९६५
श्रण ३२०
श्रण १७११
श्रथ १७१८
श्रथ १७१६
श्रथ १५३९
श्रथ ३३४
श्रथि ११६९
श्रन्थ ११६७
श्रन्थ ११६८
श्रन्थ १६३५
श्रमु ४१४
श्रम्भु १२८९
श्रा ४९
श्रिञ् ६७
श्रीञ् १०२
श्रिषु ६४१
श्रु १२८
श्रै ४५
श्रोणृ ११४९
श्लकि ९१७
श्लगि ९६६
श्लथ ३३५
श्लाखृ ९५७
श्लाघृ ९८४
श्लिष ६५१
श्लिष १७७२
श्लिषु ६४४
श्लोकृ ९३४
श्लोणृ ११५०
श्वकि ९२३
श्वच २५९
श्वचि ९९९
श्वठ १७०४
श्वठ १७०६
श्वभ्र १८९५
श्वर्त १८५८
श्वल ४७१
श्वल्क १८०८
श्वस ५२३
श्वि ६८
श्विता ५७०
श्विदि ११९०

ष.

षगे २४२
षघ २४८
षच २५५
षच २५६
षञ्ज १०३९
षट २८६
षट्ट १८३३
षण ३७२
षणु ३७०
षद १५४१
षद्लृ ३३९
षद्लृ ३४०
षप ३९३
षम ४२६
षम्ब १८७९
षर्ज १०५६
षर्ब १२८१
षर्व १३८९
षल ४५८
षस ५१२
षम ४२५
षस्ज १०७५
षस्ति ११५८
षह १५५३
षह ५३२
षह ५३३
षान्त्व १९११
षिच ५४८
षिञ् ८५
षिञ् ८६
षिट ५६१
षिध ५९०
षिधु ५९२
षिधू ५९३
षिम्भु १२८७
षिल ६१६
षिवु ६२०
षु १३१
षु १५२
षुर ७९०
षुञ् १५५
षुट्ट् १८४०
षुह ८३२
षू १७१

षूङ्	१६२	ष्णसु	५१६	सूर्क्ष	१४६१	स्पश	४८६
षूङ्	१६३	ष्णा	६२	सूर्क्ष्य	१३०९	स्पश	१७४९
षूद	१२०१	ष्णिह	१७७४	सत्र	१८९९	स्पृ	१७८
षूद	१८६७	ष्णु	१३८	सूत्र	१८९३	स्पृश	८८८
षृभु	८८६	ष्णुसु	८२८	सृ	१८६	स्पृह	१८०२
षेवृ	१४०२	ष्णुह	८३६	सृ	१८७	स्फायी	१३१३
षै	२८	ष्णै	४७	सृज	८४८	स्फिट्ट	८३४
षो	१८	ष्मिङ्	७३	सृज	८४९	स्फुट	६८५
ष्टक	२२८	ष्वद	१५४३	सृप्लृ	८८०	स्फुट	६९३
ष्टगे	२४५	ष्वद	३५२	सेकृ	९३१	स्फुट	१७७९
ष्टन	३७४	ष्वञ्ज	१०६९	स्कन्दिर्	१२०३	स्फुटिर्	६८९
ष्टभि	१२९०	ष्वप	३८४	स्कभि	१२९१	स्फुड	७१९
ष्टम	४२७	ष्वस्क	९३७	स्कुञ्	१५६	स्फुडि	१६१७
ष्टिघ	५४७	ष्विदा	५७६	स्कुदि	११९१	स्फुर	७८८
ष्टिप	५९८	ष्विदा	५७२	स्खद	३५४	स्फुर्छा	१०२१
ष्टिम	६०३	ष्विदा	५८२	स्खदिर्	३५६	स्फुल	७९७
ष्टीम	१३०१		स.	स्खल	४६८	स्फूर्जा	१०६३
ष्टुच	६६५	सपर	१९४७	स्तन	१७२६	स्यम	१७३२
स्टुञ्	१२५	सभाज	१८२९	स्तृञ्	१७९	स्मिट	१७६२
ष्टुप	१७८८	संकेत	१८६२	स्तृञ्	२१०	स्मील	१३४२
ष्टुभु	७७४	संभूयस्	१९७९	स्तृहु	९११	स्मृ	१७७
ष्टेपृ	१२४४	संवर	१९५०	स्तेन	१८७६	स्यन्दू	१२०२
ष्टै	४६	सग्रांम	१८८६	स्तोम	१८८८	स्यमु	४२८
ष्ट्यै	५८	साध	१२२५	स्त्यै	५७	स्रकि	९१५
ष्ट्रक्ष	१४५५	साम	१८८४	स्थुड	७१७	स्रम्भु	१२८८
ष्ठल	४६३	सार	१८९०	स्थूल	१९०७	स्रंसु	१४८१
ष्ठा	३८	सूच	१८१८	स्ट्रक्ष	४५५	स्रिवु	६२२
ष्ठिवु	६१७	सुख	१७७५	स्पदि	११८६	स्रेकृ	९३२
ष्ठिवु	६१८	सुख	१९३१	स्पर्ध	१२३०	स्रु	१२७

स्वन	३७३	हाक्	१४	हूड्ट	११३५	होड्ट	११३१
स्वर	१७३६	हाङ्	१५	हृ	१८०	होड्ट	११३६
स्वर्द	११९७	हि	७७	हृञ्	१९६	ह्नस	५१८
स्वाद	११९८	हिक्क	९४२	ह्री	९४	ह्राद	११९९
स्वृ	१७३	हिडि	१११९	ह्रीछ	१०२७	ह्री	९४
ह.		हिल	६१३	ह्नस	५१८	ह्रीछ	१०२७
हट	२९३	हिवि	१३७०	हृष	८९४	ह्लगे	२४४
हठ	३००	हिसि	१४९६	हृणीङ्	१९५९	ह्लप	१७२८
हद	३४९	हिसि	१६७४	हृषु	९००	ह्लस	५१९
हन	३८१	हु	१५०	हेठ	१०९८	ह्लादी	१२००
हम्म	१३००	हुडि	११२१	हेठ	१०९९	ह्मल	४६६
हय	४४२	हुडि	११२२	हेड	११३८	ह्मगे	२४३
हर्य	१३०८	हुर्च्छा	१०२०	हेड्ट	११३०	ह्मल	४६७
हल	४६४	हुल	८००	हेषृ	१४४३	ह्वृ	१७५
हसे	५२२	हुड्ट	७०९	ह्रेषृ	१४४४	ह्वृ	१७६
						ह्वेञ्	६६

इदानीं सनाद्यन्तो धातुपाठ आरभ्यते ---------------------

सनाद्यन्तो धातुपाठः

क्र.	धातुः	नि.धातु	पद	णिजन्त	सन्नन्त	यङन्त	यङ्लुगन्त
	भ्वादितः क्र्यादिगणान्ता आकारान्ता धातवः						
१.	डुदाञ् दाने	दा	उ.	दापि	दित्स	देदीय	दादा
	दानं स्वस्वत्वनिवृत्तिपूर्वकपरस्वत्वोत्पादनम् ।						
२.	दाण् दाने	दा	प.	दापि	दित्स	देदीय	दादा
	दानं स्वस्वत्वनिवृत्तिपूर्वकपरस्वत्वोत्पादनम् ।						
३.	देङ् रक्षणे	दे-दा	आ.	दापि	दित्स	देदीय	दादा
४.	दो अवखण्डने	दो-दा	प.	दापि	दित्स	देदीय	दादा
	अवखण्डनं छेदनम् ।						
५.	धेट् पाने	धे-धा	प.	धापि	धित्स	देधीय	दाधा
६.	डुधाञ्	धा	उ.	धापि	धित्स	देधीय	दाधा
	धारणपोषणयोः						
७.	मा माने	मा	प.	मापि	मित्स	मेमीय	मामा
	अकर्मकः । 'तनौ ममुस्तत्र न कैटभद्विषस्तपोधनाभ्यागमसंभवा मुदः' इति माघः । माति घृतपात्रेऽस्मिन्=परिमितं भवति । संगृहीतं भवति, इत्यर्थः ।						
८.	मेङ् प्रणिदाने	मे	आ.	मापि	मित्स	मेमीय	मामा
	प्रणिदानं प्रत्यर्पणम् ।						
९.	माङ् माने शब्दे च	मा	आ.	मापि	मित्स	मेमीय	मामा
१०.	माङ् माने	मा	आ.	मापि	मित्स	मेमीय	मामा
११.	गाङ् गतौ	गा	आ.	गापि	जिगास	जेगीय	जागा
१२.	गा स्तुतौ	गा	प.	गापि	जिगास	जेगीय	जागा
	(अयं छान्दसः)						
१३.	गै शब्दे	गै-गा	प.	गापि	जिगास	जेगीय	जागा
१४.	ओहाक् त्यागे	हा	प.	हापि	जिहास	जेहीय	जाहा
१५.	ओहाङ् गतौ	हा	आ.	हापि	जिहास	जाहाय	जाहा
१६.	पा पाने	पा	प.	पायि	पिपास	पेपीय	पापा
१७.	शो तनूकरणे	शो-शा	प.	शायि	शिशास	शाशाय	शाशा
	तनूकरणं तक्षणं, तीक्ष्णीकरणं वा ।						

क्र.	धातुः	नि.धातु	पद	णिजन्त	सन्नन्त	यङन्त	यङ्लुगन्त
१८.	*षो अन्तकर्मणि*	*सो-सा*	प.	सायि	सिषास	सेषीय	सासा
	अन्तकर्म विनाशः। समाप्तिः।						
१९.	छो छेदने	*छो-छा*	प.	छायि	चिच्छास	चाच्छाय	चाच्छा
२०.	पै शोषणे	*पै-पा*	प.	पायि	पिपास	पेपीय	पापा
२१.	पा रक्षणे	*पा*	प.	पालि	पिपास	पापाय	पापा
२२.	ओँवै शोषणे	*वै-वा*	प.	वापि	विवास	वावाय	वावा
		विधूननेऽर्थे णिचि -वाजि					
२३.	वा *गतिगन्धनयोः*	*वा*	प.	वापि	विवास	वावाय	वावा
		विधूननेऽर्थे णिचि -वाजि					

वो विधूनने जुक् *(वा. ७.३.३८) - वा इत्यस्य विधूननेऽर्थे (हवा झलना, कँपाना)* *वर्तमानस्य जुगागमो भवति णौ परतः। पक्षेणोपवाजयति। अन्यत्र पुक् - आवापयति केशान्।*

क्र.	धातुः	नि.धातु	पद	णिजन्त	सन्नन्त	यङन्त	यङ्लुगन्त
२४.	वेञ् *तन्तुसन्ताने*	*वे-वा*	उ.	वायि	विवास	वेवीय	वावा
	तन्तुसन्तानः पटनिर्माणार्थं तन्तूनां तिर्यक्प्रसारणविशेषः।						
२५.	रै शब्दे	*रै-रा*	प.	रापि	रिरास	राराय	रारा
२६.	खै खदने	*खै-खा*	प.	खापि	चिखास	चाखाय	चाखा
	खाताशयः स्थिरीभूतमना अगाधमना वा, इति धातुकाव्यम् (२-३२)						
२७.	जै क्षये	*जै-जा*	प.	जापि	जिजास	जाजाय	जाजा
२८.	षै क्षये	*सै-सा*	प.	सापि	सिषास	सासाय	सासा
२९.	शै पाके	*शै-शा*	प.	शापि	शिशास	शाशाय	शाशा
३०.	कै शब्दे	*कै-का*	प.	कापि	चिकास	चाकाय	चाका
३१.	दैप् शोधने	*दै-दा*	प.	दापि	दिदास	दादाय	दादा
३२.	दाप् लवने	*दा*	प.	दापि	दिदास	दादाय	दादा
	लवनम् छेदनम्।						
३३.	या प्रापणे	*या*	प.	यापि	यियास	यायाय	याया
३४.	भा दीप्तौ	*भा*	प.	भापि	बिभास	बाभाय	बाभा
३५.	ला आदाने	*ला*	प.	लापि	लिलास	लालाय	लाला
	दाने इति चन्द्रः। *स्नेहविपातनेऽर्थे -* लालि						
	द्वावपि दाने इति चन्द्रः। आदानं-ग्रहणम्।						

क्र.	धातुः	नि.धातु	पद	णिजन्त	सन्नन्त	यङन्त	यङ्लुगन्त
३६.	रा दाने	रा	प.	रापि	रिरास	राराय	रारा
३७.	दरिद्रा दुर्गतौ	दरिद्रा	प.	दरिद्रापि	दिदरिद्रिष	---	---
	दुर्गतिः धनहीनीभवनम्।				दिदरिद्रास	---	---
३८.	ष्ठा गतिनिवृत्तौ	स्था	प.	स्थापि	तिष्ठास	तेष्ठीय	तास्था
	गतिनिवृत्तिः गमननिरोधः।						
३९.	ज्या वयोहानौ	ज्या	प.	ज्यापि	जिज्यास	जेजीय	जाज्या
४०.	व्येञ् संवरणे	व्ये-व्या	उ.	व्यायि	विव्यास	वेवीय	वाव्या

संवरणे, उपयोगितायाम्, इति काशकृत्स्नः। आच्छादने इति क्षीरस्वामी। संवरणं स्वीकारः, आच्छादनं वा।

क्र.	धातुः	नि.धातु	पद	णिजन्त	सन्नन्त	यङन्त	यङ्लुगन्त
४१.	क्षै क्षये	क्षै-क्षा	प.	क्षापि क्षपि	चिक्षास	चाक्षाय	चाक्षा

दलि, वलि, स्खलि, रणि, ध्वनि, त्रपि क्षपयश्चेति भोजः - भोजमते एते मितः। मित्त्वात् 'मितां ह्रस्वः' इति ह्रस्वे - क्षपयति, इत्यपि। अन्यत्र-क्षापयति

क्र.	धातुः	नि.धातु	पद	णिजन्त	सन्नन्त	यङन्त	यङ्लुगन्त
४२.	ग्लै हर्षक्षये	ग्लै-ग्ला	प.	ग्लापि	जिग्लास	जाग्लाय	जाग्ला
	हर्षक्षयो धातुक्षयः। मनोमालिन्यम्।			ग्लपि			

ग्ला-स्ना-वनु-वमां च - अनुपसर्गादिषां मित्त्वं वा स्यात्। तेन मितां ह्रस्वः' इति ह्रस्वे ग्लपयति, ग्लापयति। सोपसर्गात् मित्त्वं न - संग्लापयति।

क्र.	धातुः	नि.धातु	पद	णिजन्त	सन्नन्त	यङन्त	यङ्लुगन्त
४३.	म्लै हर्षक्षये	म्लै-म्ला	प.	म्लापि	मिम्लास	माम्लाय	माम्ला
४४.	द्यै न्यक्करणे	द्यै-द्या	प.	द्यापि	दिद्यास	दाद्याय	दाद्या
	न्यक्करणं तिरस्कारः। अनादरः।						
४५.	श्रै पाके	श्रै-श्रा	प.	श्रपि	शिश्रास	शाश्राय	शाश्रा
	स्नै इति केषुचित्पाठः। पाकभिन्नेऽर्थे			श्रापि			

श्रै पाके - अयं पाकेऽर्थे मित्। श्रपयति। पाकादन्यत्र श्रापयति=स्वेदयति।

क्र.	धातुः	नि.धातु	पद	णिजन्त	सन्नन्त	यङन्त	यङ्लुगन्त
४६.	ष्टै वेष्टने	स्तै-स्ता	प.	स्तापि	तिष्टास	तास्ताय	तास्ता
४७.	ष्णै वेष्टने	स्नै-स्ना	प.	स्नापि	सिष्णास	सास्नाय	सास्ना
	शोभायां चेत्येके						
४८.	द्रै स्वप्ने	द्रै-द्रा	प.	द्रापि	दिद्रास	दाद्राय	दाद्रा
४९.	श्रा पाके	श्रा	प.	श्रपि	शिश्रास	शाश्राय	शाश्रा
	पाकभिन्नेऽर्थे	श्रै-श्रा		श्रापि			

क्र.	धातुः	नि.धातु	पद	णिजन्त	सन्नन्त	यङन्त	यङ्लुगन्त
	श्रा पाके - अयं पाकेऽर्थे मित्। श्रपयति। पाकादन्यत्र श्रापयति=स्वेदयति।						
५०.	*द्रा॒ कुत्सायाम् गतौ*	*द्रा*	*प.*	द्रापि	दिद्रास	दाद्राय	दाद्रा
	कुत्सितगतिः - गर्हितगमनम्।						
५१.	*ध्मा॒ पूरणे*	*ध्मा*	*प.*	ध्मापि	दिध्मास	देध्मीय	दाध्मा
	शब्दाग्निसंयोगयोः। मुखादिना चाग्निसंयोगे।						
५२.	*प्रा॒ पूरणे*	*प्रा*	*प.*	प्रापि	पिप्रास	पाप्राय	पाप्रा
५३.	*प्यै॒ङ् वृद्धौ*	*प्यै-प्या*	*आ.*	प्यापि	पिप्यास	पाप्याय	पाप्या
५४.	*श्यै॒ङ् गतौ*	*श्यै-श्या*	*आ.*	श्यापि	शिश्यास	शाश्याय	शाश्या
५५.	*त्रै॒ङ् पालने*	*त्रै-त्रा*	*आ.*	त्रापि	तित्रास	तात्राय	तात्रा
५६.	*घ्रा॒ गन्धोपादाने*	*घ्रा*	*प.*	घ्रापि	जिघ्रास	जेघ्रीय	जाघ्रा
५७.	*स्त्यै॒ शब्दसंघातयोः*	*स्त्यै-स्त्या*	*प.*	स्त्यापि	तिस्त्यास	तास्त्याय	तास्त्या
५८.	*ष्ट्यै॒ शब्दसंघातयोः*	*स्त्यै-स्त्या*	*प.*	स्त्यापि	तिष्ट्यास	तास्त्याय	तास्त्या
५९.	*ध्रै॒ तृप्तौ*	*ध्रै-ध्रा*	*प.*	ध्रापि	दिध्रास	दाध्राय	दाध्रा
६०.	*म्ना॒ अभ्यासे*	*म्ना*	*प.*	म्नापि	मिम्नास	माम्नाय	माम्ना
	अभ्यासः पारम्पर्येण वृत्तिः						
६१.	*ध्यै॒ चिन्तायाम्*	*ध्यै-ध्या*	*प.*	ध्यापि	दिध्यास	दाध्याय	दाध्या
६२.	*ष्णा॒ शौचे*	*स्ना*	*प.*	स्नपि	सिष्णास	सास्नाय	सास्ना
				स्नापि			

ग्ला-स्ना-वनु-वमां च - अनुपसर्गादिषां मित्त्वं वा स्यात्। तेन मितां ह्रस्वः' इति ह्रस्वे स्नपयति, स्नापयति। सोपसर्गात् मित्त्वं न - संस्नापयति।

क्र.	धातुः	नि.धातु	पद	णिजन्त	सन्नन्त	यङन्त	यङ्लुगन्त
६३.	*प्सा॒ भक्षणे*	*प्सा*	*प.*	प्सापि	पिप्सास	पाप्साय	पाप्सा
६४.	*ज्ञा॒ अवबोधने*	*ज्ञा*	*प.*	ज्ञापि	जिज्ञास	जाज्ञाय	जाज्ञा
				ज्ञपि			

ज्ञा मारणतोषणनिशामनेषु। निशानेषु इति पाठान्तरम् - मारण्=हिंसा, निशामनम्=चाक्षुषज्ञानम् इति माधवः। ज्ञापनमात्रमित्यन्ये। निशानेषु इति पाठान्तरम्। निशानम्=तीक्ष्णीकरणम् एष्वर्थेषु जानातिर्मित्। तेन मितां ह्रस्वः' इति ह्रस्वे - पशुं संज्ञपयति=अक्षतं मारयति। हरिं ज्ञपयति=संतोषयति। रूपं ज्ञपयति=दर्शयति, बोधयति वा। शरं ज्ञपयति=तीक्ष्णीकरोति।

क्र.	धातुः	नि.धातु	पद	णिजन्त	सन्नन्त	यङन्त	यङ्लुगन्त
६५.	ख्या प्रकथने	ख्या	प.	ख्यापि	चिख्यास	चाख्याय	चाख्या
६६.	ह्वेञ् स्पर्धायां	ह्वे-ह्वा	उ.	ह्वायि	जुहूष	जोहूय	जाह्वा

शब्दे च। शब्दः आकारणा।

भ्वादितः क्र्यादिगणान्ता इकारान्ता, ईकारान्ता धातवः

क्र.	धातुः	नि.धातु	पद	णिजन्त	सन्नन्त	यङन्त	यङ्लुगन्त
६७.	श्रिञ् सेवायाम्	श्रि	उ.	श्रायि	शिश्रयिष शिश्रीष	शेश्रीय	शेश्रि
६८.	टुओश्वि गतिवृद्ध्योः	श्वि	प.	श्वायि	शिश्वयिष	शोशूय	शिश्वि शेश्वीय
६९.	क्षि क्षये।	क्षि	प.	क्षायि	चिक्षीष	चेक्षीय	चेक्षि

क्षयो नाशः। क्षि अकर्मकः। अन्तर्भावितण्यर्थस्तु सकर्मकः। नश्यति, नाशयति वा।

क्र.	धातुः	नि.धातु	पद	णिजन्त	सन्नन्त	यङन्त	यङ्लुगन्त
७०.	क्षि हिंसायाम्	क्षि	प.	क्षायि	चिक्षीष	चेक्षीय	चेक्षि

अयं भाषायामपि। ऋक्षि इत्येके, रिक्षि इत्यन्ये।

क्र.	धातुः	नि.धातु	पद	णिजन्त	सन्नन्त	यङन्त	यङ्लुगन्त
७१.	क्षि निवासगत्योः	क्षि	प.	क्षायि	चिक्षीष	चेक्षीय	चेक्षि
७२.	ज्रि अभिभवे	ज्रि	प.	ज्रायि	जिज्रीष	जेज्रीय	जेज्रि

अभिभवः न्यूनीकरणं न्यूनीभवनम् वा।

क्र.	धातुः	नि.धातु	पद	णिजन्त	सन्नन्त	यङन्त	यङ्लुगन्त
७३.	ष्मिङ् ईषद्हसने	स्मि	आ.	स्मापि	सिस्मयिष	सेष्मीय	सेष्मि

भीस्म्योर्हेतुभये (१.३.६८) – अकर्त्रभिप्रायेऽपि क्रियाफले, बिभेतेः स्मयतेश्च ण्यन्तादात्मनेपदं भवति हेतुभये (प्रयोजक कर्ता से भय होने पर) जटिलो विस्मापयते। मुण्डो विस्मापयते। हेतुभये इति किम्? रूपेण विस्माययति। रूपं विस्मयस्य करणं, न हेतुः।

क्र.	धातुः	नि.धातु	पद	णिजन्त	सन्नन्त	यङन्त	यङ्लुगन्त
७४.	जि जये	जि	प.	जापि	जिगीष	जेजीय	जेजि

जयः उत्कर्षप्राप्तिः। अकर्मकोऽयम्।

क्र.	धातुः	नि.धातु	पद	णिजन्त	सन्नन्त	यङन्त	यङ्लुगन्त
७५.	जि अभिभवे	जि	प.	जापि	जिगीष	जेजीय	जेजि

अभिभवः न्यूनीकरणं न्यूनीभवनम् वा।

क्र.	धातुः	नि.धातु	पद	णिजन्त	सन्नन्त	यङन्त	यङ्लुगन्त
७६.	कि ज्ञाने (छान्दसः)	कि	प.	कायि	चिकीष	चेकीय	चेकि
७७.	हि गतौ, वृद्धौ च	हि	प.	हायि	जिहीष	जेहीय	जेहि
७८.	रि हिंसायाम्	रि	प.	रायि	रिरीष	रेरीय	रेरि
७९.	रि गतौ	रि	प.	रायि	रिरीष	रेरीय	रेरि
८०.	पि गतौ	पि	प.	पायि	पिपीष	पेपीय	पेपि

क्र.	धातुः	नि.धातुः	पदम्	णिजन्तः	सन्नन्तः	यङन्तः	यङ्लुगन्तः
८१.	*धि धारणे*	*धि*	प.	धायि	दिधीष	देधीय	देधि
८२.	*इङ् अध्ययने*	*अधि+इ*	*आ.*	अध्यापि	अधिजिगांस	--	---
	नित्यमधिपूर्वः। अध्ययनं पठनम्।						
	बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यो णेः (१.३.८६) - बुध्, युध्, नश्, जन्, इङ्, इत्यादिभ्यो ण्यन्तेभ्यः परस्मैपदं भवति। इङ् + णिच् = अध्यापयति (बोध कराता है)।						
८३.	*इक् स्मरणे*	*अधि+इ*	प.	अधिगमि	अधिजिगमिष	---	---
	नित्यमधिपूर्वः। स्मरणम् चिन्तनम्।						
८४.	*इण् गतौ*	इ	प.	गमि	जिगमिष	---	---
	णौ गमिरबोधने (२.४.४६) - अबोधनार्थस्य इणो गमादेशो भवति णौ। गमयति। बोधने न भवति - प्रत्याययति।						
८५.	*षिञ् बन्धने*	*सि*	*उ.*	सायि	सिसीष	सेषीय	सेषि
८६.	*षिञ् बन्धने*	*सि*	*उ.*	सायि	सिसीष	सेषीय	सेषि
८७.	*शिञ् निशाने*	*शि*	*उ.*	शायि	शिशीष	शेशीय	शेशि
	निशानं तीक्ष्णीकरणम्						
८८.	*चिञ् चयने*	*चि*	*उ.*	चायि	चिचीष	चेचीय	चेचि
	चयनं रचनाविशेषः, राशीकरणम् वा।			चापि	चिकीष		
८९.	*डुमिञ् प्रक्षेपणे*	*मि*	*उ.*	मापि	मित्स	मेमीय	मेमि
९०.	*चिरि हिंसायाम्*	*चिरि*	प.	चिरायि	चिचिरयिष	---	---
९१.	*जिरि हिंसायाम्*	*जिरि*	प.	जिरायि	जिजिरयिष	---	---
९२.	*प्रीङ् प्रीतौ*	*प्री*	*आ.*	प्रायि	पिप्रीष	पेप्रीय	पेप्री
	प्रीतिस्तुष्टिः। मुत्प्रीतिः प्रमदो हर्षः। फलमूलादिना हरिः प्रीयते, हृष्यतीत्यर्थः।						
९३.	*व्रीङ् वृणोत्यर्थे*	*व्री*	*आ.*	व्रायि	विव्रीष	वेव्रीय	वेव्री
९४.	*ह्री लज्जायाम्*	*ह्री*	प.	ह्रेपि	जिह्रीष	जेह्रीय	जेह्री
९५.	*व्री वरणे*	*व्री*	प.	व्रायि	विव्रीष	वेव्रीय	वेव्री
९६.	*भ्री भये*	*भ्री*	प.	भ्रायि	बिभ्रीष	बेभ्रीय	बेभ्री
९७.	*क्षीष् हिंसायाम्*	*क्षी*	प.	क्षायि	चिक्षीष	चेक्षीय	चेक्षी
९८.	*व्ली वरणे*	*व्ली*	प.	व्लेपि	विव्लीष	वेव्लीय	वेव्ली
९९.	*प्ली गतौ*	*प्ली*	प.	प्लायि	पिप्लीष	पेप्लीय	पेप्ली

क्र.	धातुः	नि.धातुः	पदम्	णिजन्तः	सन्नन्तः	यङन्तः	यङ्लुगन्तः
१००.	डुक्रीञ् द्रव्यविनिमये	क्री	उ.	क्रापि	चिक्रीष	चेक्रीय	चेक्री
	विनिमयः परिवर्तः।						
१०१.	प्रीञ् तर्पणे कान्तौ च	प्री	उ.	प्रीणि	पिप्रीष	पेप्रीय	पेप्री
	कान्तिरभिलाषः।						
१०२.	श्रीञ् पाके	श्री	उ.	श्रायि	शिश्रीष	शेश्रीय	शेश्री
१०३.	री गतिरेषणयोः	री	प.	रेपि	रिरीष	रेरीय	रेरी
	रेषणं वृकशब्दः। हिंसा।						
१०४.	रीङ् स्रवणे	री	आ.	रेपि	रिरीष	रेरीय	रेरी
१०५.	पीङ् पाने	पी	आ.	पायि	पिपीष	पेपीय	पेपी
१०६.	शीङ् स्वप्ने	शी	आ.	शायि	शिशयिष	शाशय्य	शेशी
१०७.	णीञ् प्रापणे	नी	उ.	नायि	निनीष	नेनीय	नेनी
	प्रापणम्-आसादनम्।						
१०८.	दीङ् क्षये	दी	आ.	दापि	दिदीष	देदीय	देदी
१०९.	मीङ् हिंसायाम्	मी	आ.	मायि	मिमास	मेमीय	मेमी
११०.	धीङ् आधारे	धी	आ.	धायि	दिधीष	देधीय	देधी
	आधारः आधारणम्। स्थापनं इति यावत्।						
१११.	लीङ् श्लेषणे	ली	आ.	लायि लापि	लिलीष	लेलीय	लेली

स्नेहविपातनेऽर्थे णिचि- लीनि, लालि

लियः सम्माननशालीनीकरणयोश्च (१.३.७०) – *लीङ् श्लेषणे, ली श्लेषणे उभयोर्ग्रहणम्। लियो ण्यन्तात् सम्मानने, शालीनीकरणे, प्रलम्भने च वर्तमानादात्मनेपदं भवति। सम्माननं पूजनम्। जटाभिः आलापयते – जटाओं से सम्मान पाता है। शालीनीकरणं न्यग्भावनम् – श्येनो वर्तिकामुल्लापयते – बाज बत्तख को दबोचता है। प्रलम्भनं मिथ्याफलाख्यानम् – कस्त्वामुल्लापयते – कौन तुम्हें ठगता है ?*

क्र.	धातुः	नि.धातुः	पदम्	णिजन्तः	सन्नन्तः	यङन्तः	यङ्लुगन्तः
११२.	डीङ् विहायसा गतौ	डी	आ.	डायि	डिडयिष	डेडीय	डेडी
११३.	डीङ् विहायसा गतौ	डी	आ.	डायि	डिडयिष	डेडीय	डेडी
	विहायसा गतिः आकाशमार्गेण गमनम् चलना						

क्र.	धातुः	नि.धातुः	पदम्	णिजन्तः	सन्नन्तः	यङन्तः	यङ्लुगन्तः
११४.	*ली श्लेषणे*	*ली*	*प.*	लायि लापि	लिलीष	लेलीय	लेली

स्नेहविपातनेऽर्थे णिचि -लीनि, लालि

लियः सम्माननशालीनीकरणयोश्च (१.३.७०) - लीङ् श्लेषणे, ली श्लेषणे उभयोर्ग्रहणम्। लियो ण्यन्तात् सम्मानने, शालीनीकरणे, प्रलम्भने च वर्तमानादात्मनेपदं भवति। सम्माननं पूजनम्। जटाभिः आलापयते - जटाओं से सम्मान पाता है। शालीनीकरणं न्यग्भावनम् - श्येनो वर्तिकामुल्लापयते - बाज बत्तख को दबोचता है। प्रलम्भनं मिथ्याफलाख्यानम्- कस्त्वामुल्लापयते - कौन तुम्हें ठगता है ?

क्र.	धातुः	नि.धातुः	पदम्	णिजन्तः	सन्नन्तः	यङन्तः	यङ्लुगन्तः
११५.	*ञिभी भये*	*भी*	*प.*	भायि	बिभीष	बेभीय	बेभी
		हेतुभये -		भापि, भीषि			

भीस्म्योर्हेतुभये (१.३.६८) - अकर्त्रभिप्रायेऽपि क्रियाफले, बिभेतेः स्मयतेश्च ण्यन्तादात्मनेपदं भवति हेतुभये (प्रयोजक कर्ता से भय होने पर) जटिलो भीषयते। मुण्डो भीषयते। हेतुभये इति किम्? कुञ्चिकयैनं भाययति। कुञ्चिका भयस्य करणं, न हेतुः।

क्र.	धातुः	नि.धातुः	पदम्	णिजन्तः	सन्नन्तः	यङन्तः	यङ्लुगन्तः
११६.	वी *गतिव्याप्तिप्रजन-* *कान्त्यसनखदनेषु।*	वी प्रजनेऽर्थे -	*प.*	वायि वापि	विवीष	वेवीय	वेवी
	वी ई इति प्रश्लेषः	*ई*	*प.*	आयि	ईषिष	---	---
	प्रजनः गर्भाधानम्। असनं क्षेपणम्।						
११७.	*मीञ् हिंसायाम्*	*मी*	उ.	मापि	मित्स	मेमीय	मेमी
११८.	दीधीङ् दीप्तिदेवनयोः	दीधी	आ.	दीधि	दिदीधिष	---	---
	दीप्तिः प्रकाशः। देवनम्-दुःखम्						
११९.	वेवीङ् वेतिना तुल्ये	वेवी	आ.	वेवि	विवेविष	---	--
	(इमौ छान्दसौ) *वीधातोः येऽर्थाः त एवार्था अस्यापि।*						
१२०.	*ईङ् गतौ*	ई	*आ.*	आयि	ईषिष	---	---

भ्वादितः क्र्यादिगणान्ता उकारान्ता, ऊकारान्ता धातवः

क्र.	धातुः	नि.धातुः	पदम्	णिजन्तः	सन्नन्तः	यङन्तः	यङ्लुगन्तः
१२१.	*ऊर्णुञ् आच्छादने*	*ऊर्णु*	*उ.*	ऊर्णावि	ऊर्णुनविष	ऊर्णोनूय ऊर्णुनूष ऊर्णुनुविष	ऊर्णोनु
१२२.	कुङ् शब्दे-कुटादिः	कु	*आ.*	कावि	चुकूष	चोकूय	चोकु

क्र.	धातुः	नि.धातुः	पदम्	णिजन्तः	सन्नन्तः	यङन्तः	यङ्लुगन्तः
१२३.	ध्रु गतिस्थैर्ययोः	ध्रु	प.	ध्रावि	दुध्रूष	दोध्रूय	दोध्रु
	कुटादिः, सकर्मकः । तं दुध्रावाद्रिणा कपिः । भट्टिः ।						
१२४.	गु पुरीषोत्सर्गे-कुटादिः	गु	प.	गावि	जुगूष	जोगूय	जोगु
	पुरीषोत्सर्गः मलत्यागः ।						
१२५.	ष्टुञ् स्तुतौ	स्तु	उ.	स्तावि	तुष्टूष	तोष्टूय	तोष्टु
१२६.	द्रु गतौ	द्रु	प.	द्रावि	दुद्रूष	दोद्रूय	दोद्रु
१२७.	स्रु गतौ	स्रु	प.	स्रावि	सुस्रूष	सोस्रूय	सोस्रु

बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यो णेः (१.३.८६) - बुध्, युध्, नश्, जन्, इङ्, प्रु, द्रु, स्रु, इत्येतेभ्यो ण्यन्तेभ्यः परस्मैपदं भवति। स्रु + णिच् = स्रावयति

क्र.	धातुः	नि.धातुः	पदम्	णिजन्तः	सन्नन्तः	यङन्तः	यङ्लुगन्तः
१२८.	श्रु श्रवणे	श्रु	प.	श्रावि	शुश्रूष	शोश्रूय	शोश्रु
१२९.	ध्रु स्थैर्ये	ध्रु	प.	ध्रावि	दुध्रूष	दोध्रूय	दोध्रु
१३०.	दु गतौ	दु	प.	दावि	दुदूष	दोदूय	दोदु
१३१.	षु प्रसवैश्वर्ययोः	सु	प.	सावि	सुसूष	सोषूय	सोषु
१३२.	धुञ् कम्पने	धु	उ.	धावि	दुधूष	दोधूय	दोधु
	धूञ् इत्येके	धू		धूनि	दुधूष	दोधूय	दोधू
१३३.	णु स्तुतौ	नु	प.	नावि	नुनूष	नोनूय	नोनु
१३४.	यु मिश्रणेऽमिश्रणे च	यु	प.	यावि	यियविष युयूष	योयूय	योयु
१३५.	रु शब्दे	रु	प.	रावि	रुरूष	रोरूय	रोरु
१३६.	टुक्षु शब्दे	क्षु	प.	क्षावि	चुक्षूष	चोक्षूय	चोक्षु
१३७.	क्ष्णु तेजने	क्ष्णु	प.	क्ष्णावि	चुक्ष्णूष	चोक्ष्णूय	चोक्ष्णु
	तेजनं तीक्ष्णीकरणम्।						
१३८.	ष्णु प्रस्रवणे	स्नु	प.	स्नावि	सुस्नूष	सोष्णूय	सोष्णु
	प्रस्रवणम्-निःस्यन्दनम्।						
१३९.	उङ् शब्दे	उ	आ.	आवि	ऊषिष	---	---
१४०.	गुङ् अव्यक्ते शब्दे	गु	आ.	गावि	जुगूष	जोगूय	जोगु
१४१.	कुङ् शब्दे	कु	आ.	कावि	चुकूष	कोकूय	कोकु
	दीर्घान्त इति कैयटादयः, ह्रस्वान्त इति न्यासः।						

क्र.	धातुः	नि.धातुः	पदम्	णिजन्तः	सन्नन्तः	यङन्तः	यङ्लुगन्तः
१४२.	घुङ् शब्दे	घु	आ.	घावि	जुघूष	जोघूय	जोघु
१४३.	ङुङ् शब्दे	ङु	आ.	ङावि	जुङूष	जोङूय	जोङु

(उङ्, कुङ्, खुङ्, घुङ्, गुङ्, ङुङ्, इत्यन्ये)

क्र.	धातुः	नि.धातुः	पदम्	णिजन्तः	सन्नन्तः	यङन्तः	यङ्लुगन्तः
१४४.	च्युङ् गतौ	च्यु	आ.	च्यावि	चुच्यूष	चोच्यूय	चोच्यु
१४५.	ज्युङ् गतौ	ज्यु	आ.	ज्यावि	जुज्यूष	जोज्यूय	जोज्यु
१४६.	प्रुङ् गतौ	प्रु	आ.	प्रावि	पुप्रूष	पोप्रूय	पोप्रु

बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यो णेः (१.३.८६) - बुध्, युध्, नश्, जन्, इङ्, प्रु, द्रु, स्रु, इत्येतेभ्यो ण्यन्तेभ्यः परस्मैपदं भवति। प्रु + णिच् = प्रावयति

क्र.	धातुः	नि.धातुः	पदम्	णिजन्तः	सन्नन्तः	यङन्तः	यङ्लुगन्तः
१४७.	प्लुङ् गतौ	प्लु	आ.	प्लावि	पुप्लूष	पोप्लूय	पोप्लु
१४८.	रुङ् गतिरेषणयोः	रु	आ.	रावि	रुरूष	रोरूय	रोरु

रेषणम्-हिंसाशब्दः। आरावः, आरवः इत्यादिः।

क्र.	धातुः	नि.धातुः	पदम्	णिजन्तः	सन्नन्तः	यङन्तः	यङ्लुगन्तः
१४९.	ह्नुङ् अपनयने	ह्नु	आ.	ह्नावि	जुह्नूष	जोह्नूय	जोह्नु

अपनयनं दूरीकरणम्।

क्र.	धातुः	नि.धातुः	पदम्	णिजन्तः	सन्नन्तः	यङन्तः	यङ्लुगन्तः
१५०.	हु दानादनयोः	हु	प.	हावि	जुहूष	जोहूय	जोहु

आदाने चेत्येके। दानं चेह प्रक्षेपः। स च विधिबोधित आधारे आहवनीयादौ अग्नौ पुरोडाशादिहविष, इत्यर्थोऽनादिसिद्धलोकव्यवहाराल्लभ्यते। तथा च विधिबोधितस्य देवतायै त्यज्यमानस्य हविषः प्रक्षेपे हुधातुर्वर्तति। अदनं भक्षणम्।

क्र.	धातुः	नि.धातुः	पदम्	णिजन्तः	सन्नन्तः	यङन्तः	यङ्लुगन्तः
१५१.	कु शब्दे	कु	प.	कावि	चुकूष	चोकूय	चोकु
१५२.	षु प्रसवैश्वर्ययोः	सु	प.	सावि	सुसूष	सोषूय	सोषु
१५३.	टुदु उपतापे	दु	प.	दावि	दुदूष	दोदूय	दोदु
१५४.	द्यु अभिगमने	द्यु	प.	द्यावि	दुद्यूष	दोद्यूय	दोद्यु

अभिगमनं सर्वतो गमनम्।

क्र.	धातुः	नि.धातुः	पदम्	णिजन्तः	सन्नन्तः	यङन्तः	यङ्लुगन्तः
१५५.	षुञ् अभिषवे	सु	उ.	सावि	सुसूष	सोषूय	सोषु

अभिषवः - स्नपनं, पीडनं, स्नानं, सुरासन्धानं, सुरोत्पादनं वा।

क्र.	धातुः	नि.धातुः	पदम्	णिजन्तः	सन्नन्तः	यङन्तः	यङ्लुगन्तः
१५६.	स्कुञ् आप्रवणे	स्कु	उ.	स्कावि	चुस्कूष	चोस्कूय	चोस्कु

आप्रवणमुद्धरणम्।

क्र.	धातुः	नि.धातुः	पदम्	णिजन्तः	सन्नन्तः	यङन्तः	यङ्लुगन्तः
१५७.	युञ् बन्धने	यु	उ.	यावि	युयूष	योयूय	योयु
१५८.	ब्रूञ् व्यक्तायां वाचि	ब्रू	उ.	वाचि	विवक्ष	वावच्य	वावच्

क्र.	धातुः	नि.धातुः	पदम्	णिजन्तः	सन्नन्तः	यङन्तः	यङ्लुगन्तः
१५९.	णू स्तवने-कुटादिः	नू	प.	नावि	नुनूष	नोनूय	नोनू
१६०.	धू विधूनने-कुटादिः विधूननं कम्पनम्।	धू	प.	धावि	दुधूष	दोधूय	दोधू
१६१.	मूङ् बन्धने	मू	आ.	मावि	मुमूष	मोमूय	मोमू
१६२.	षूङ् प्राणिगर्भ- विमोचने वेट्	सू	आ.	सावि	सुसूष	सोषूय	सोषू
१६३.	षूङ् प्राणिप्रसवे वेट् प्राणिगर्भविमोचनम्-प्रसवः।	सू	आ.	सावि	सुसूष	सोषूय	सोषू
१६४.	पूङ् पवने	पू	आ.	पावि	पिपविष	पोपूय	पोपू
१६५.	दूङ् परितापे परितापो दुःखम्।	दू	आ.	दावि	दुदूष	दोदूय	दोदू
१६६.	पूञ् पवने पवनं शुद्धिः।	पू	उ.	पावि	पुपूष	पोपूय	पोपू
१६७.	द्रूञ् हिंसायाम्	द्रू	उ.	द्रावि	दुद्रूष	दोद्रूय	दोद्रू
१६८.	लूञ् छेदने	लू	उ.	लावि	लुलूष	लोलूय	लोलू
१६९.	क्नूञ् शब्दे	क्नू	उ.	क्नावि	चुक्नूष	चोक्नूय	चोक्नू
१७०.	धूञ् कम्पने वेट् *ध्वजानुद्दुधुवुस्तुङ्गान्। भट्टिः। धूनोति चम्पकवनानि।*	धू	उ.	धूनि	दुधूष	दोधूय	दोधू
१७१.	षू प्रेरणे	सू	प.	सावि	सुसूष	सोषूय	सोषू
१७२.	भू सत्तायाम् सतो भावः सत्ता। सा च आत्मधारणरूपा। स्वरूपेणावस्थानम् इत्यर्थः।	भू	प.	भावि	बुभूष	बोभूय	बोभू

भ्वादितः क्र्यादिगणान्ता ॠकारान्ता धातवः

क्र.	धातुः	नि.धातुः	पदम्	णिजन्तः	सन्नन्तः	यङन्तः	यङ्लुगन्तः
१७३.	स्वॄ शब्दोपतापयोः *उपतापो रोगः।*	स्वॄ	प.	स्वारि	सिस्वरिष सुस्वूर्ष	सास्वर्य	सरिस्वृ सरीस्वृ सर्स्वृ
१७४.	ध्वॄ हूर्च्छने *हूर्च्छनम्-कौटिल्यम्।*	ध्वॄ	प.	ध्वारि	दुध्वूर्ष	दाध्वर्य	दरिध्वृ दरीध्वृ दर्ध्वृ

क्र.	धातुः	नि.धातुः	पदम्	णिजन्तः	सन्नन्तः	यङन्तः	यङ्लुगन्तः
१७५.	ह्वृ कौटिल्ये	ह्वृ	प.	ह्वारि	जिह्वीर्ष	जाह्वर्य	जरिह्वृ
							जरीह्वृ
							जर्ह्वृ
१७६.	ह्वृ संवरणे	ह्वृ	प.	ह्वारि	जिह्वीर्ष	जाह्वर्य	जरिह्वृ
	संवरणे उपयोगितायाम्, इति काशकृत्स्नः। आच्छादने इति क्षीरस्वामी।						जरीह्वृ
							जर्ह्वृ
१७७.	स्मृ चिन्तायाम्	स्मृ	प.	स्मारि	सुस्मूर्ष	सास्मर्य	सर्स्मृ
	आध्याने च। चिन्ता स्मृतिः।			स्मरि			सरिस्मृ
	आध्यानम् उत्कण्ठापूर्वकं स्मरणम्।						सरीस्मृ
	स्मृ आध्याने – *स्मृ धातुराध्यानेऽर्थे मित् भवति। मित्संज्ञायाम् 'मितां ह्रस्वः' इत्यनेन ह्रस्वः - स्मरयति। अन्यत्र चिन्तादौ - स्मारयति।*						
१७८.	स्पृ प्रीतिपालनयोः	स्पृ	प.	स्पारि	पुस्पूर्ष	पास्पर्य	पर्स्पृ
	प्रीतिचलनयोरित्यन्ये, स्मृ इत्येके।						परिस्पृ
	(पृ, स्पृ एतौ छान्दसौ। छन्दसि दृष्टानुविधिर्भवति।)						परीस्पृ
	चलनं जीवनम्, इति स्वामी।						
१७९.	स्तृञ् आच्छादने	स्तृ	उ.	स्तारि	तिस्तीर्ष	तास्तर्य	तर्स्तृ
							तरिस्तृ
							तरीस्तृ
१८०.	हृ प्रसह्यकरणे	हृ	प.	हारि	जिहीर्ष	जेह्रीय	जर्हृ
	प्रसह्यकरणं बलात्कारकरणम्।						जरिहृ
							जरीहृ
१८१.	गृ सेचने	गृ	प.	गारि	जिगीर्ष	जेग्रीय	जर्गृ
							जरिगृ
							जरीगृ
१८२.	घृ सेचने	घृ	प.	घारि	जिघीर्ष	जेघ्रीय	जर्घृ
	क्षरणम् प्रस्रवणम्। जघर्म्यग्निं मनसा घृतेन, इति बह्वृचपाठः।						जरिघृ
	जिघर्म्यग्निं मनसा घृतेन, इति तैत्तिरीयपाठः।						जरीघृ

क्र.	धातुः	नि.धातुः	पदम्	णिजन्तः	सन्नन्तः	यङन्तः	यङ्लुगन्तः
१८३.	घृ क्षरणदीप्त्योः (छान्दसः)	घृ	प.	घारि	जिघीर्ष	जेघ्रीय	जर्घृ जरिघृ जरीघृ
१८४.	पॄ प्रीतौ	पॄ	प.	पारि	पुपूर्ष	पेप्रीय	पर्पृ परिपृ परीपृ
१८५.	दॄ हिंसायाम्	दॄ	प.	दारि	दिदीर्ष	देद्रीय	दर्दृ दरिदृ दरीदृ
१८६.	सॄ गतौ	सॄ	प.	सारि	सिसीर्ष	सेस्रीय	सर्सृ सरिसृ सरीसृ
१८७.	सॄ गतौ (छान्दसः)	सॄ	प.	सारि	सिसीर्ष	सेस्रीय	सर्सृ सरिसृ सरीसृ
१८८.	ॠ गतौ (छान्दसः)	ॠ	प.	अर्पि	अरिरिष	अरार्य	अर्ऋ अरियृ
१८९.	ॠ गतिप्रापणयोः	ॠ	प.	अर्पि	अरिरिष	अरार्य	अर्ऋ अरियृ
१९०.	जागृ निद्राक्षये निद्राक्षयः जागरणम्।	जागृ	प.	जागरि	जिजागरिष	--	--
१९१.	धृङ् अवस्थाने अवध्वंसनम्-विनाशः।	धृ	आ.	धारि	दिधरिष	देध्रीय	दर्धृ दरिधृ दरीधृ
१९२.	धृङ् अवध्वंसने	धृ	आ.	धारि	दिधीर्ष	देध्रीय	दर्धृ दरिधृ दरीधृ
१९३.	पृङ् व्यायामे प्रायेण व्याङ्पूर्वः।	पृ	आ.	पारि	पुपूर्ष	पेप्रीय	पर्पृ परिपृ परीपृ

क.	धातुः	नि.धातुः	पदम्	णिजन्तः	सन्नन्तः	यङन्तः	यङ्लुगन्तः
१९४.	*दृङ् आदरे*	दृ	*आ.*	दारि	दिदरिष	देद्रीय	दर्दृ
							दरिदृ
							दरीदृ
१९५.	*मृङ् प्राणत्यागे*	मृ	*आ.*	मारि	मुमूर्ष	मेम्रीय	मर्मृ
							मरिमृ
							मरीमृ
१९६.	*धृञ् धारणे*	धृ	उ.	धारि	दिधीर्ष	देध्रीय	दर्धृ
							दरिधृ
							दरीधृ
१९७.	*हृञ् हरणे*	हृ	उ.	हारि	जिहीर्ष	जेह्रीय	जरिहृ
							जरीहृ
							जर्हृ
१९८.	*भृञ् भरणे*	भृ	उ.	भारि	बुभूर्ष	बेभ्रीय	बर्भृ
	भरणं पोषणम् ।				बिभरिष		बरिभृ
							बरीभृ
१९९.	*डुभृञ् धारणपोषणयोः*	भृ	उ.	भारि	बुभूर्ष	बेभ्रीय	बर्भृ
	पोषणं पालनम् ।						बरिभृ
							बरीभृ
२००.	*कृञ् हिंसायाम्*	कृ	उ.	कारि	चिकीर्ष	चेक्रीय	चर्कृ
							चरिकृ
							चरीकृ
२०१.	*डुकृञ् करणे*	कृ	उ.	कारि	चिकीर्ष	चेक्रीय	चर्कृ
							चरिकृ
							चरीकृ
२०२.	वृञ् वरणे	वृ	उ.	वारि	वुवूर्ष	वेव्रीय	वर्वृ
					विवरिष		वरिवृ
					विवरीष		वरीवृ

क्र.	धातुः	नि.धातुः	पदम्	णिजन्तः	सन्नन्तः	यङन्तः	यङ्लुगन्तः
२०३.	वृङ् सम्भक्तौ *संभक्तिः संसेवा, भजनम्।*	वृ	आ.	वारि	वुवूर्ष विवरिष विवरीष	वेव्रीय	वर्वृ वरिवृ वरीवृ

भ्वादितः क्र्यादिगणान्ता ॠकारान्ता धातवः

क्र.	धातुः	नि.धातुः	पदम्	णिजन्तः	सन्नन्तः	यङन्तः	यङ्लुगन्तः
२०४.	वॄञ् वरणे	वॄ	उ.	वारि	वुवूर्ष विवरिष विवरीष	वोवूर्य	वावॄ
२०५.	वॄ वरणे (भरण इत्येके)	वॄ	प.	वारि	वुवूर्ष विवरिष विवरीष	वोवूर्य	वावॄ
२०६.	भॄ भर्त्सने (भरणेऽप्येके)	भॄ	प.	भारि	बुभूर्ष बिभरिष बिभरीष	बोभूर्य	बाभॄ
२०७.	मॄ हिंसायाम्	मॄ	प.	मारि	मुमूर्ष मिमरिष मिमरीष	मोमूर्य	मामॄ
२०८.	पॄ पालनपूरणयोः पूरणं तृप्तिः।	पॄ	प.	पारि	पुपूर्ष पिपरिष पिपरीष	पोपूर्य	पापॄ
२०९.	पॄ पालनपूरणयोः पूरणं तृप्तिः।	पॄ	प.	पारि	पुपूर्ष पिपरिष पिपरीष	पोपूर्य	पापॄ
२१०.	स्तॄञ् आच्छादने	स्तॄ	उ.	स्तारि	तिस्तीर्ष तिस्तरिष तिस्तरीष	तेस्तीर्य	तास्तॄ
२११.	कॄञ् हिंसायाम्	कॄ	उ.	कारि	चिकीर्ष चिकरिष चिकरीष	चेकीर्य	चाकॄ

क्र.	धातुः	नि.धातुः	पदम्	णिजन्तः	सन्नन्तः	यङन्तः	यङ्लुगन्तः
२१२.	शॄ हिंसायाम्	शॄ	प.	शारि	शिशीर्ष शिशरिष शिशरीष	शेशीर्य	शाशॄ
२१३.	दॄ विदारणे	दॄ	प.	दारि दरि	दिदीर्ष दिदरिष दिदरीष	देदीर्य	दादॄ

दॄ भये मित् - अयं दॄ विदारणे इति क्रैयादिक एव। दृणन्तं प्रेरयति दरयति। भयादन्यत्र दारयति। केषाञ्चित् मते तु धात्वन्तरोऽयम्, इति दरति।

क्र.	धातुः	नि.धातुः	पदम्	णिजन्तः	सन्नन्तः	यङन्तः	यङ्लुगन्तः
२१४.	तॄ प्लवनतरणयोः *प्लवनम् - प्लुतगतिः, मज्जनम्।* *तरणम् - प्लवनम्, सन्तरणं लङ्घनं च।*	तॄ	प.	तारि	तितीर्ष तितरिष तितरीष	तेतीर्य	तातॄ
२१५.	जॄष् वयोहानौ	जॄ	प.	जरि	जिजीर्ष जिजरिष जिजरीष	जेजीर्य	जाजॄ

जनी जॄष् क्नसु रञ्जोऽमन्ताश्च - जनी जॄष्, क्नसु, रञ्ज् अमन्ताश्च धातवो मितो भवन्ति। तेन 'मितां ह्रस्वः' इति णौ ह्रस्वः। जरयति।

क्र.	धातुः	नि.धातुः	पदम्	णिजन्तः	सन्नन्तः	यङन्तः	यङ्लुगन्तः
२१६.	जॄ वयोहानौ झॄ इत्येके।	जॄ झॄ	प. प.	जारि	जिजीर्ष जिजरिष जिजरीष	जेजीर्य	जाजॄ
२१७.	झॄष् वयोहानौ	झॄ	प.	झारि	जिझीर्ष जिझरिष जिझरीष	जेझीर्य	जाझॄ
२१८.	कॄ विक्षेपे	कॄ	प.	कारि	चिकरिष चिकरीष	चेकीर्य	चाकॄ
२१९.	गॄ निगरणे *निगरणं गिलनम्।*	गॄ	प.	गारि	जिगरिष जिगरीष जिगलिष	जेगिल्य	जागॄ

क्र.	धातुः	नि.धातुः	पदम्	णिजन्तः	सन्नन्तः	यङन्तः	यङ्लुगन्तः
२२०.	नॄ नये	नॄ	प.	नारि नरि	निनीर्ष निनरिष निनरीष	नेनीर्य	नानॄ

नॄ नये - अयं नयेऽर्थे मित्। नरयति। नयादन्यत्र नारयति।

क्र.	धातुः	नि.धातुः	पदम्	णिजन्तः	सन्नन्तः	यङन्तः	यङ्लुगन्तः
२२१.	कॄ हिंसायाम्	कॄ	प.	कारि	चिकीर्ष चिकरिष चिकरीष	चेकीर्य	चाकॄ
२२२.	गॄ शब्दे	गॄ	प.	गारि	जिगीर्ष जिगरिष जिगरीष	---	---
२२३.	ॠ गतौ	ॠ	प.	आरि	ईर्षिष अरिरिष अरिरीष	---	---

भ्वादितः क्र्यादिगणान्ता अदुपधधातवः

क्र.	धातुः	नि.धातुः	पदम्	णिजन्तः	सन्नन्तः	यङन्तः	यङ्लुगन्तः
२२४.	अकँ कुटिलायां गतौ	अक्	प.	अकि	अचिकिष	---	---
२२५.	*शक्लृँ शक्तौ*	शक्	प.	शाकि	शिक्ष	शाशक्य	शाशक्
२२६.	तकँ हसने	तक्	प.	ताकि	तितकिष	तातक्य	तातक्
२२७.	चकँ तृप्तौ	चक्	प.	चकि	चिचकिष	चाचक्य	चाचक्

चकँ इत्येष धातुः तृप्तावेव मित् भवति, न प्रतीघाते। तृप्तौ - चकयति।

क्र.	धातुः	नि.धातुः	पदम्	णिजन्तः	सन्नन्तः	यङन्तः	यङ्लुगन्तः
२२८.	ष्टकँ प्रतिघाते	स्तक्	प.	स्तकि	तिस्तकिष	तास्तक्य	तास्तक्
२२९.	शकँ' विभाषितो मर्षणे सेट्कोऽयमित्येके। अनिट्पक्षे -	शक्	उ.	शाकि	शिशकिष शिशक्ष	शाशक्य	शाशक्
२३०.	चकँ तृप्तौ प्रतिघाते च	चक्	आ.	चाकि	चिचकिष	चाचक्य	चाचक्

तृप्तिः तर्पणम्। अयं तृप्तौ अकर्मकः। प्रतिघाते सकर्मकः। तृप्तौ मित् परस्मैपदी च। प्रतिघाते अमित्, आत्मनेपदी।

क्र.	धातुः	नि.धातुः	पदम्	णिजन्तः	सन्नन्तः	यङन्तः	यङ्लुगन्तः
२३१.	ककँ लौल्ये	कक्	आ.	काकि	चिककिष	चाकक्य	चाकक्

लौल्यं गर्वश्चापल्यं च।

क्र.	धातुः	नि.धातुः	पदम्	णिजन्तः	सन्नन्तः	यङन्तः	यङ्लुगन्तः
२३२.	कखँ हसने	कख्	प.	कखि	चिकखिष	चाकख्य	चाकख्

क्र.	धातुः	नि.धातुः	पदम्	णिजन्तः	सन्नन्तः	यङन्तः	यङ्लुगन्तः
२३३.	कखँ हसने	कख्	प.	काखि	चिकखिष	चाकख्य	चाकख्
२३४.	बखँ गतौ	बख्	प.	बाखि	बिबखिष	बाबख्य	बाबख्
२३५.	मखँ गतौ	मख्	प.	माखि	मिमखिष	मामख्य	मामख्
२३६.	णखँ गतौ	नख्	प.	नाखि	निनखिष	नानख्य	नानख्
२३७.	रखँ गतौ	रख्	प.	राखि	रिरखिष	रारख्य	रारख्
२३८.	लखँ गतौ	लख्	प.	लाखि	लिलखिष	लालख्य	लालख्
२३९.	अगँ कुटिलायां गतौ	अग्	प.	अगि	अजिगिष	---	---
२४०.	लगँ सङ्गे	लग्	प.	लगि	लिलगिष	लालग्य	लालग्
२४१.	रगँ शङ्कायाम्	रग्	प.	रगि	रिरगिष	रारग्य	रारग्
२४२.	षगँ संवरणे	सग्	प.	सगि	सिसगिष	सासग्य	सासग्
२४३.	ह्गँ संवरणे	ह्ग्	प.	ह्गि	जिह्गिष	जाह्ग्य	जाह्ग्
२४४.	ह्लगँ संवरणे	ह्लग्	प.	ह्लगि	जिह्लगिष	जाह्लग्य	जाह्लग्
२४५.	ष्टगँ संवरणे	स्तग्	प.	स्तगि	तिस्तगिष	तास्तग्य	तास्तग्
	संवरणं स्वीकारः ।						
२४६.	कगँ नोच्यते	कग्	प.	कगि	चिकगिष	चाकग्य	चाकग्
	कलिः कामधेनुरितिवदयं धातुरप्यमितार्थक, इत्यर्थः ।						
२४७.	घघँ हसने	घघ्	प.	घाघि	जिगघिष	जाघघ्य	जाघघ्
२४८.	षघँ हिंसायाम्	सघ्	प.	साघि	सिसघिष	सासघ्य	सासघ्
२४९.	दघँ घातने पालने च	दघ्	प.	दाघि	दिदघिष	दादघ्य	दादघ्
२५०.	**वचँ परिभाषणे**	**वच्**	प.	वाचि	विवक्ष	वावच्य	वावच्
	परिभाषणं सर्वतः कथनम्						
२५१.	व्यचँ व्याजीकरणे	व्यच्	प.	व्याचि	विव्यचिष	वेविच्य	वाव्यच्
	व्याजीकरणम् छद्मकरणम् ।						
२५२.	खचँ भूतप्रादुर्भावे	खच्	प.	खाचि	चिखचिष	चाखच्य	चाखच्
	खवँ पूतिप्रादुर्भावे	खव्	प.	खावि	चिखविष	चाखव्य	----
	इति काशकृत्स्नः						
२५३.	*डुपचँष् पाके*	*पच्*	उ.	पाचि	पिपक्ष	पापच्य	पापच्
२५४.	त्वचँ संवरणे	त्वच्	प.	त्वाचि	तित्वचिष	तात्वच्य	तात्वच्
	संवरणम्-आच्छादनम् ।						

क्र.	धातुः	नि.धातुः	पदम्	णिजन्तः	सन्नन्तः	यङन्तः	यङ्लुगन्तः
२५५.	षचँ समवाये	सच्	उ.	साचि	सिसचिष	सासच्य	सासच्
	समवायः सम्बन्धः। सङ्घीभवनम्।						
२५६.	षचँ सेचने, सेवने च	सच्	आ.	साचि	सिसचिष	सासच्य	सासच्
	सेचनम् आर्द्रीकरणम्। सेवनं संभक्तिः।						
२५७.	शचँ व्यक्तायां वाचि	शच्	आ.	शाचि	शिशचिष	शाशच्य	शाशच्
२५८.	मचँ कल्कने	मच्	आ.	माचि	मिमचिष	मामच्य	मामच्
	कथने इत्यन्ये। कल्कनं दम्भः शाठ्यं च। परविस्रम्भार्थं धर्माद्याचरणं दम्भः कापट्यापरपर्यायः। कपटोऽस्त्री व्याजदम्भोपधयः, इत्यमरः। शाठ्यं कुटिलीभावः। निकृतस्त्वनृजुः शठः इत्यमरः।						
२५९.	श्वचँ गतौ	श्वच्	आ.	श्वाचि	शिश्वचिष	शाश्वच्य	शाश्वच्
२६०.	कचँ बन्धने	कच्	आ.	काचि	चिकचिष	चाकच्य	चाकच्
२६१.	अजँ गतिक्षेपणयोः	अज्	प.	वायि	विवीष	वेवीय	----
२६२.	यजँ देवपूजासङ्गतिकरणदानेषु	यज्	उ.	याजि	यियक्ष	यायज्य	यायज्
	देवान् यजते=पूजयति, संगमयति, ददाति वा।						
२६३.	भजँ सेवायाम्	भज्	उ.	भाजि	बिभक्ष	बाभज्य	बाभज्
२६४.	त्यजँ हानौ	त्यज्	प.	त्याजि	तित्यक्ष	तात्यज्य	तात्यज्
२६५.	ओँलजीँ व्रीडायाम्	लज्	आ.	लाजि	लिलजिष	लालज्य	लालज्
२६६.	लजँ भर्जने	लज्	प.	लाजि	लिलजिष	लालज्य	लालज्
	भर्त्सयति इति काशकृत्स्नः। जलं विना तण्डुलादेः सन्तापविशेषो भर्जनम्। भर्त्सनं त्वपकारगीः।						
२६७.	जजँ युद्धे	जज्	प.	जाजि	जिजजिष	जाजज्य	जाजज्
२६८.	ध्रजँ गतौ	ध्रज्	प.	ध्राजि	दिध्रजिष	दाध्रज्य	दाध्रज्
२६९.	ध्वजँ गतौ	ध्वज्	प.	ध्वाजि	दिध्वजिष	दाध्वज्य	दाध्वज्
२७०.	खजँ मन्थे	खज्	प.	खाजि	चिखजिष	चाखज्य	चाखज्
	मन्थो विलोडनम्।						
२७१.	गजँ शब्दे मदने च	गज्	प.	गाजि	जिगजिष	जागज्य	जागज्
	मदनं मदः चित्तविकारः। मदनं मदोत्पत्तिः इति स्वामी।						
२७२.	वजँ गतौ	वज्	प.	वाजि	विवजिष	वावज्य	वावज्

क्र.	धातुः	नि.धातुः	पदम्	णिजन्तः	सन्नन्तः	यङन्तः	यङ्लुगन्तः
२७३.	व्रजँ गतौ	व्रज्	प.	व्राजि	विव्रजिष	वाव्रज्य	वाव्रज्
२७४.	अटँ गतौ	अट्	प.	आटि	अटिटिष	अटाट्य	अटाट्
२७५.	घटँ चेष्टायाम्	घट्	आ.	घटि	जिघटिष	जाघट्य	जाघट्

कथं तर्हि 'कमलवनोद्घाटनं कुर्वति ये'। 'प्रविघाटयिता समुत्पतन् हरिदश्वः कमलाकरानिव' इत्यादि। अत्र समाधानम् - घट संघाते इति चौरादिकस्येदम्। न च तस्यैवार्थविशेषे मित्त्वार्थमनुवादोऽयम्। नान्ये मितोऽहेतौ इति निषेधात्।

क्र.	धातुः	नि.धातुः	पदम्	णिजन्तः	सन्नन्तः	यङन्तः	यङ्लुगन्तः
२७६.	कटँ वर्षावरणयोः	कट्	प.	कटि	चिकटिष	चाकट्य	चाकट्

आवरणम् आच्छादनम्।

क्र.	धातुः	नि.धातुः	पदम्	णिजन्तः	सन्नन्तः	यङन्तः	यङ्लुगन्तः
२७७.	कटीँ गतौ	कट्	प.	काटि	चिकटिष	चाकट्य	चाकट्

केचित् इदितं मत्वा नुमि कृते कण्टतीत्यादि वदन्ति। अन्ये तु इ ई इति प्रश्लिष्य 'इ' इति पृथग्धातुं मन्यन्ते। अस्य लटि - अयति अयतः अयन्ति, इति रूपाणि भवन्ति।

क्र.	धातुः	नि.धातुः	पदम्	णिजन्तः	सन्नन्तः	यङन्तः	यङ्लुगन्तः
२७८.	वटँ परिभाषणे	वट्	प.	वटि	विवटिष	वावट्य	वावट्
२७९.	भटँ परिभाषणे	भट्	प.	भटि	बिभटिष	बाभट्य	बाभट्
२८०.	णटँ नृत्तौ, गतौ,	नट्	प.	नटि	निनटिष	नानट्य	नानट्
	नतावित्येके			नाटि			

णट नृत्तौ, अयं घटादित्वात् मित्। मित्त्वात् 'मितां ह्रस्वः' इति ह्रस्वः। अस्य नृत्यं नृत्तं चार्थः। यत्कारिषु नर्तकव्यपदेशः। पदार्थाभिनयो नृत्यम्। गात्रविक्षेपमात्रं नृत्तम्। अयं णोपदेशः। अपरो यः पठिष्यते 'णट नृत्तौ' इति तस्य नाट्यमर्थः। स च मिन्न। नाटयति।

क्र.	धातुः	नि.धातुः	पदम्	णिजन्तः	सन्नन्तः	यङन्तः	यङ्लुगन्तः
२८१.	णटँ नृत्तौ	नट्	प.	नाटि	निनटिष	नानट्य	नानट्
२८२.	पटँ गतौ	पट्	प.	पाटि	पिपटिष	पापट्य	पापट्
२८३.	रटँ परिभाषणे	रट्	प.	राटि	रिरटिष	रारट्य	रारट्

परिभाषणम् अनृतभाषणम्।

क्र.	धातुः	नि.धातुः	पदम्	णिजन्तः	सन्नन्तः	यङन्तः	यङ्लुगन्तः
२८४.	लटँ बाल्ये	लट्	प.	लाटि	लिलटिष	लालट्य	लालट्

बाल्ये शिशुक्रीडायाम्।

क्र.	धातुः	नि.धातुः	पदम्	णिजन्तः	सन्नन्तः	यङन्तः	यङ्लुगन्तः
२८५.	शटँ रुजाविशरण-	शट	प.	शाटि	शिशटिष	शाशट्य	शाशट्

गत्यवसादनेषु। *निवासे इति क्षीरतरङ्गिणी। रुजा-रोगः। विशरणम्-अवयवविभागः। अवसादनम्-दुःखम्।*

क्र.	धातुः	नि.धातुः	पदम्	णिजन्तः	सन्नन्तः	यङन्तः	यङ्लुगन्तः
२८६.	षटँ अवयवे	सट्	प.	साटि	सिसटिष	सासट्य	सासट्

क्र.	धातुः	नि.धातुः	पदम्	णिजन्तः	सन्नन्तः	यङन्तः	यङ्लुगन्तः
२८७.	जटँ संघाते	जट्	प.	जाटि	जिजटिष	जाजट्य	जाजट्
२८८.	तटँ उच्छ्राये	तट्	प.	ताटि	तितटिष	तातट्य	तातट्
२८९.	वटँ वेष्टने	वट्	प.	वाटि	विवटिष	वावट्य	वावट्
२९०.	झटँ संघाते	झट्	प.	झाटि	जिझटिष	जाझट्य	जाझट्
२९१.	भटँ भृतौ	भट्	प.	भाटि	बिभटिष	बाभट्य	बाभट्
२९२.	खटँ काङ्क्षायाम्	खट्	प.	खाटि	चिखटिष	चाखट्य	चाखट्
२९३.	हटँ दीप्तौ	हट्	प.	हाटि	जिहटिष	जाहट्य	जाहट्
२९४.	पठँ व्यक्तायां वाचि	पठ्	प.	पाठि	पिपठिष	पापठ्य	पापठ्
२९५.	मठँ मदनिवासयोः	मठ्	प.	माठि	मिमठिष	मामठ्य	मामठ्
	स्थौल्यं पुष्टता। मदः चित्तविकारः।						
२९६.	रठँ परिभाषणे	रठ्	प.	राठि	रिरठिष	रारठ्य	रारठ्
	रटँ इत्यन्ये। *परिहासः, सनिन्दोपालम्भश्च परिभाषणम्।*						
२९७.	शठँ कैतवे च	शठ्	प.	शाठि	शिशठिष	शाशठ्य	शाशठ्
२९८.	वठँ स्थौल्ये	वठ्	प.	वाठि	विवठिष	वावठ्य	वावठ्
२९९.	कठँ कृच्छ्रजीवने	कठ्	प.	काठि	चिकठिष	चाकठ्य	चाकठ्
३००.	हठँ प्लुतिशठत्वयोः बलात्कार इत्यन्ये	हठ	प.	हाठि	जिहठिष	जाहठ्य	जाहठ्
३०१.	अडँ उद्यमे	अड्	प.	आडि	अडिडिष	---	---
३०२.	लडँ विलासे	लड्	प.	लाडि लडि	लिलडिष	लालड्य	लालड्
	ललँ इत्येके	लल्		लालि	लिललिष	लालल्य	लालल्

डलयोर्लरयोश्चैकत्वस्मरणाल्ललति इति स्वाम्यादयः। *कुक्कुरस्य लडितानि।अयं जिह्वोन्मथनेऽपि। जिह्वोन्मथनं जिह्वाव्यापारः। जिह्वया ज्ञापनम्।*

लडिः जिह्वोन्मथने मित् - जिह्वाशब्देन तद्व्यापारः शब्दप्रयोगादिरूपो लक्ष्यते। लडयति जिह्वाम्। रसानां रसान् ज्ञापयति, इत्यर्थः। लडयति जिह्वया। देवदत्तो रसान् जानाति, तज्जिह्वया ज्ञापयति, इत्यर्थः। लडयति शत्रून्। अपशब्दैर्गर्हिते, इत्यर्थः। उन्मथनं लोडनम् - लडयति दधि। विलोडयति, इत्यर्थः। अन्यत्र अमित्। लाडयति पुत्रम् (= पुत्र को लाड़ करता है अथवा खेल खिलाता है।)

क्र.	धातुः	नि.धातुः	पदम्	णिजन्तः	सन्नन्तः	यङन्तः	यङ्लुगन्तः
३०३.	कडँ मदे,	कड्	प.	काडि	चिकडिष	चाकड्य	चाकड्
	कडि इत्येके	कण्ड्	प.	कण्डि	चिकण्डिष	चाकण्ड्य	चाकण्ड्
३०४.	गडँ सेचने	गड्	प.	गडि	जिगडिष	जागड्य	जागड्
३०५.	कडँ मदे	कड्	प.	काडि	चिकडिष	चाकड्य	चाकड्
३०६.	अणँ शब्दे	अण्	प.	आणि	अणिणिष	---	---
३०७.	अणँ प्राणने (अन इत्येके)	अण्	आ.	आणि	अणिणिष	----	----
३०८.	क्षणुँ हिंसायाम्	क्षण्	उ.	क्षाणि	चिक्षणिष	चङ्क्षण्य	चङ्क्षण्
३०९.	फणँ गतौ	फण्	प.	फणि	पिफणिष	पम्फण्य	पम्फण्
३१०.	रणँ शब्दार्थः	रण्	प.	राणि रणि	रिरणिष	रंरण्य	रंरण्

दलि, वलि, स्खलि, रणि, ध्वनि, त्रपि क्षपयश्चेति भोजः – भोजमते एते मितः। मित्त्वात् 'मितां ह्रस्वः' इति ह्रस्वे रणयति। अन्यमते अमित्त्वात् राणयति।

क्र.	धातुः	नि.धातुः	पदम्	णिजन्तः	सन्नन्तः	यङन्तः	यङ्लुगन्तः
३११.	मणँ शब्दार्थः	मण्	प.	माणि	मिमणिष	मम्मण्य	मम्मण्
३१२.	वणँ शब्दार्थः	वण्	प.	वाणि	विवणिष	वंवण्य	वंवण्
३१३.	भणँ शब्दार्थः	भण्	प.	भाणि	बिभणिष	बम्भण्य	बम्भण्
३१४.	कणँ शब्दार्थः	कण्	प.	काणि	चिकणिष	चङ्कण्य	चङ्कण्
३१५.	क्वणँ शब्दार्थः	क्वण्	प.	क्वाणि	चिक्वणिष	चङ्क्वण्य	चङ्क्वण्
३१६.	व्रणँ शब्दार्थः	व्रण्	प.	व्राणि	विव्रणिष	वंव्रण्य	वंव्रण्
३१७.	भ्रणँ शब्दार्थः	भ्रण्	प.	भ्राणि	बिभ्रणिष	बम्भ्रण्य	बम्भ्रण्
३१८.	ध्वणँ शब्दार्थः	ध्वण्	प.	ध्वाणि	दिध्वणिष	दन्ध्वण्य	दन्ध्वण्

धणँ इत्यपि केचित्। नान्तोऽयम्। बण इत्यपि केचित्। धाणि।

क्र.	धातुः	नि.धातुः	पदम्	णिजन्तः	सन्नन्तः	यङन्तः	यङ्लुगन्तः
३१९.	कणँ गतौ	कण्	प.	कणि	चिकणिष	चङ्कण्य	चङ्कण्
३२०.	श्रणँ दाने च,	श्रण्	प.	श्रणि	शिश्रणिष	शंश्रण्य	शंश्रण्
३२१.	चणँ दाने च	चण्	प.	चणि	चिचणिष	चञ्चण्य	चञ्चण्
३२२.	शणँ दाने च, शणँ गतावित्यन्ये	शण्	प.	शणि	शिशणिष	शंशण्य	शंशण्
३२३.	रणँ गतौ	रण्	प.	रणि	रिरणिष	रंरण्य	रंरण्

क्र.	धातुः	नि.धातुः	पदम्	णिजन्तः	सन्नन्तः	यङन्तः	यङ्लुगन्तः
३२४.	पणँ॒ व्यवहारे स्तुतौ च	पण्	आ.	पाणि	पिपणिष	पम्पण्य	पम्पण्
	स्तुतावर्थे आयः, व्यवहारे न।			पणायि	पिपणायिष	----	---
३२५.	अतँ सातत्यगमने	अत्	प.	आति	अतितिष	----	---
	सातत्यगमनम्, अनवरतचलनम्, नित्यगतिर्वा।						
३२६.	यतीँ॒ प्रयत्ने	यत्	आ.	याति	यियतिष	यायत्य	यायत्
३२७.	चतेँ याचने	चत्	उ.	चाति	चिचतिष	चाचत्य	चाचत्
३२८.	पत्लृँ गतौ	पत्	प.	पाति	पिपतिष पित्स	पनीपत्य	पनीपत्
३२९.	क्वथेँ निष्पाके	क्वथ्	प.	क्वाथि	चिक्वथिष	चाक्वथ्य	चाक्वथ्
३३०.	पथेँ गतौ	पथ्	प.	पाथि	पिपथिष	पापथ्य	पापथ्
३३१.	मथेँ विलोडने	मथ्	प.	माथि	मिमथिष	मामथ्य	मामथ्
	निष्पाकः नितरां पाचनम्। विलोडनं प्रतिघातः।						
३३२.	व्यथँ॒ भयसञ्चलनयोः	व्यथ्	आ.	व्यथि	विव्यथिष	वाव्यथ्य	वाव्यथ्
३३३.	प्रथँ॒ प्रख्याने	प्रथ्	आ.	प्रथि	पिप्रथिष	पाप्रथ्य	पाप्रथ्
	प्रख्यानम्-प्रसिद्धिः।						
३३४.	श्रथँ, (श्नथँ)	श्रथ्	प.	श्रथि	शिश्रथिष	शाश्रथ्य	शाश्रथ्
३३५.	श्लथँ हिंसार्थाः	श्लथ्	प.	श्लथि	शिश्लथिष	शाश्लथ्य	शाश्लथ्
३३६.	क्लथँ हिंसार्थाः	क्लथ्	प.	क्लथि	चिक्लथिष	चाक्लथ्य	चाक्लथ्
३३७.	क्रथँ हिंसार्थाः	क्रथ्	प.	क्राथि	चिक्रथिष	चाक्रथ्य	चाक्रथ्
३३८.	*अ॒दँ भक्षणे*	*अद्*	*प.*	आदि	जिघत्स	----	----
३३९.	*ष॒द्लृँ विशरण-गत्यवसादनेषु*	*सद्*	*प.*	सादि	सिषत्स	सासद्य	सासद्
३४०.	*ष॒द्लृँ विशरण गत्यवसादनेषु। विशरणम् अवयवविभागः।*	*सद्*	*प.*	सादि	सिषत्स	सासद्य	सासद्
३४१.	*श॒द्लृँ शातने*	*शद्*	*प.*	शादि	शिशत्स	शाशद्य	शाशद्
	शातनं दुःखानुभवः।						
	णिचि शातनं पीडनम्। तस्मिन्नर्थे -			शाति			
३४२.	*श॒द्लृँ शातने*	*शद्*	*प.*	शादि	शिशत्स	शाशद्य	शाशद्

क्र.	धातुः	नि.धातुः	पदम्	णिजन्तः	सन्नन्तः	यङन्तः	यङ्लुगन्तः
	विशरणम् अवयवविभागः।						
	णिचि शातनं पीडनम्। तस्मिन्नर्थे -			शाति			
३४३.	मदीँ हर्षे	मद्	प.	मादि मदि	मिमदिष	मामद्य	मामद्
	मदी हर्षग्लेपनयोः मित् - हर्षग्लेपनयो रर्थयोर्मदधातुर्मिद् भवति। तेन णौ 'मितां ह्रस्वः' इति ह्रस्वो भवति। मदयति। अन्येष्वर्थेषु मादयति।						
३४४.	बदँ स्थैर्ये	बद्	प.	बादि	बिबदिष	बाबद्य	बाबद्
३४५.	रदँ विलेखने	रद्	प.	रादि	रिरदिष	रारद्य	रारद्
	विलेखनम् भेदनम्। उत्पाटनम्।						
३४६.	णदँ अव्यक्ते शब्दे	नद्	प.	नादि	निनदिष	नानद्य	नानद्
	अव्यक्तशब्दः, अमनुष्यपशुपक्ष्यादिकृतशब्दप्रयोगः।						
३४७.	खदँ स्थैर्ये हिंसायां च	खद्	प.	खादि	चिखदिष	चाखद्य	चाखद्
	चाद् भक्षणे। स्थैर्यं स्थिरीभवनम्।						
३४८.	वदँ व्यक्तायां वाचि	वद्	प.	वादि	विवदिष	वावद्य	वावद्
	व्यक्तवाक् मनुष्यकृतशब्दप्रयोगः।						
३४९.	*हदँ पुरीषोत्सर्गे*	*हद्*	*आ.*	हादि	जिहत्स	जाहद्य	जाहद्
	पुरीषोत्सर्गः - मलत्यागः।						
३५०.	*पदँ गतौ*	*पद्*	*आ.*	पादि	पित्स	पनीपद्य	पनीपद्
३५१.	ददँ दाने	दद्	आ.	दादि	दिददिष	दादद्य	दादद्
	न तु द्रव्यत्यागः। तथा सति धात्वर्थोपसंग्रहादकर्मकतापत्तेः।						
३५२.	ष्वदँ आस्वादने	स्वद्	आ.	स्वादि	सिस्वदिष	सास्वद्य	सास्वद्
	अयमनुभवे सकर्मकः। रुचौ अकर्मकः। आस्वादनम् अनुभवः। प्रीतिविषयीभावात्मिका रुचिर्वा।						
३५३.	म्रदँ मर्दने	म्रद्	आ.	म्रदि	मिम्रदिष	माम्रद्य	माम्रद्
३५४.	स्खदँ स्खदने	स्खद्	आ.	स्खदि	चिस्खदिष	चास्खद्य	चास्खद्
	मर्दनं पीडनम्। स्खदनं विद्रावणम्।						
३५५.	चदेँ याचने	चद्	उ.	चादि	चिचदिष	चाचद्य	चाचद्
३५६.	स्खदिर् स्खदने	स्खद्	प.	स्खदि	चिस्खदिष	चास्खद्य	चास्खद्

क्र.	धातुः	नि.धातुः	पदम्	णिजन्तः	सन्नन्तः	यङन्तः	यङ्लुगन्तः

स्वदिः अवपरिभ्यां च - अव परि इत्येताभ्यामुत्तरः स्वदिर्धातुर्मिन्न भवति। अवस्वादयति, परिस्वादयति। अन्यत्र - स्वदयति। निरुपसर्गो मित् - स्वदयति।

क्र.	धातुः	नि.धातुः	पदम्	णिजन्तः	सन्नन्तः	यङन्तः	यङ्लुगन्तः
३५७.	गदँ व्यक्तायां वाचि	गद्	प.	गादि	जिगदिष	जागद्य	जागद्
	व्यक्तवाक् मनुष्यकृतशब्दप्रयोगः।						
३५८.	बधँ बन्धने	बध्	आ.	बाधि	बिबाधयिष	---	---
	बीभत्स		आ.	बीभत्सि	बीभत्सिष	---	---
३५९.	व्यधँ ताडने	व्यध्	प.	व्याधि	विव्यत्स	वेविध्य	वाव्यध्
३६०.	रधँ हिंसासंराद्ध्योः	रध्	प.	रन्धि	रिरधिष रिरत्स	रारध्य	रारध्
३६१.	दधँ धारणे	दध्	आ.	दाधि	दिदधिष	दादध्य	दादध्
३६२.	वनुँ याचने	वन्	आ.	वानि	विवनिष	वंवन्य	वंवन्
	उदित्करणसामर्थ्यात् वनु इत्यपूर्वोऽयं धातुर्न तु तानादिकस्यानुवादः।						
३६३.	मनुँ अवबोधने	मन्	आ.	मानि	मिमनिष	मम्मन्य	मम्मन्
३६४.	मनँ ज्ञाने	मन्	आ.	मानि	मिमंस	मम्मन्य	मम्मन्
३६५.	तनुँ विस्तारे	तन्	उ.	तानि	तितनिष तितांस तितंस	तन्तन्य	तन्तन्
३६६.	वनँ सम्भक्तौ	वन्	प.	वानि	विवनिष	वंवन्य	वंवन्
	सम्भक्तिः सम्यक् सेवनम्।						
३६७.	जनीँ प्रादुर्भावे	जन्	आ.	जनि	जिजनिष	जञ्जन्य जाजाय	जञ्जन्
	प्रादुर्भावः अतिक्रान्तोत्पत्तिः।						

बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यो णेः *(१.३.८६)* - *'णिचश्च'* इति कर्त्रभिप्राये क्रियाफल आत्मनेपदमुक्तम्। तदपवादोऽयम्। बुध्, युध्, नश्, जन्, इङ्, प्रु, द्रु, स्रु, इत्येतेभ्यो ण्यन्तेभ्यः परस्मैपदं भवति। जन् + णिच् = जनयति *(उत्पन्न करता है)*।

क्र.	धातुः	नि.धातुः	पदम्	णिजन्तः	सन्नन्तः	यङन्तः	यङ्लुगन्तः
३६८.	जनँ जनने	जन्	प.	जानि	जिजनिष	जञ्जन्य जाजाय	जञ्जन्
	(छान्दसः) उत्पत्तौ अकर्मकः। उत्पादने सकर्मकः।						
३६९.	खनुँ अवदारणे	खन्	उ.	खानि	चिखनिष	चङ्खन्य चाखाय	चङ्खन्
	अवदारणं खननम्।						

क्र.	धातुः	नि.धातुः	पदम्	णिजन्तः	सन्नन्तः	यङन्तः	यङ्लुगन्तः
३७०.	षणुँ दाने	सन्	उ.	सानि	सिसनिष	संसन्य	संसन्
					सिषास	सासाय	
३७१.	कनीँ दीप्तिकान्तिगतिषु	कन्	प.	कानि	चिकनिष	चङ्कन्य	चङ्कन्
	दीप्तिः प्रकाशः, कान्तिः शोभा। गतिः गमनम्।						
३७२.	षणँ सम्भक्तौ	सन्	प.	सानि	सिसनिष	संसन्य	संसन्
	नान्तोऽयम्। सम्भक्तिः सम्यक् सेवनम्।					सिषास	सासाय
३७३.	स्वनँ शब्दे	स्वन्	प.	स्वानि	सिस्वनिष	संस्वन्य	संस्वन्
				स्वनि			

स्वन अवतंसने मित् - स्वनयति - अवतंसयति अलंकरोति वा। अन्यत्र अमित् - स्वानयति।

क्र.	धातुः	नि.धातुः	पदम्	णिजन्तः	सन्नन्तः	यङन्तः	यङ्लुगन्तः
३७४.	ष्टनँ शब्दे	स्तन्	प.	स्तानि	तिस्तनिष	तंस्तन्य	तंस्तन्
३७५.	वनँ शब्दे	वन्	प.	वानि	विवनिष	वंवन्य	वंवन्
३७६.	वनँ हिंसायाम्	वन्	प.	वानि	विवनिष	वंवन्य	वंवन्
३७७	वनुँ हिंसायाम्	वन्	प.	वनि	विवनिष	वंवन्य	वंवन्
	अयं तनादिर्वनुर्नोच्यते			वानि	विवनिष	वंवन्य	वंवन्

ग्ला, स्ना, वनु, वमां च *- वनु च (३७७) अयमनुपसर्गो वा मित्। तेन वा ह्रस्वः। वनयति, वानयति। सोपसर्गस्तु नित्यं मित्। प्रवनयति।*

क्र.	धातुः	नि.धातुः	पदम्	णिजन्तः	सन्नन्तः	यङन्तः	यङ्लुगन्तः
३७८.	ध्वनँ शब्दे	ध्वन्	प.	ध्वानि	दिध्वनिष	दन्ध्वन्य	दन्ध्वन्
				ध्वनि			

ध्वनधातुः शब्देऽर्थे मिद् भवति। *ध्वनयति घण्टाम्। शब्दायमानां करोति, इत्यर्थः। अन्येष्वर्थेषु अमित् - ध्वानयति, अस्पष्टाक्षरमुच्चारयति, इत्यर्थः।*

क्र.	धातुः	नि.धातुः	पदम्	णिजन्तः	सन्नन्तः	यङन्तः	यङ्लुगन्तः
३७९.	धनँ धान्ये	धन्	प.	धानि	दिधनिष	दन्धन्य	दन्धन्
	(अयं छान्दसः)						
३८०.	ध्रणँ शब्दे	ध्रण्	प.	ध्राणि	दिध्रणिष	दन्ध्रन्य	दन्ध्रन्
	बण इति केचित्। नान्तोऽयम्। तस्य फलं तु यङ्लुकि - दन्ध्रन्ति।						
३८१.	हनँ हिंसागत्योः	हन्	प.	घाति	जिघांस	जङ्घन्य	जङ्घन्
	हिंसायाम्-					जेघ्नीय	

हन् - ताडनम्। भेर्यो निजघ्निरे। कुट्टनम्। व्रीहीनवहन्ति। वादनम्।

क्र.	धातुः	नि.धातुः	पदम्	णिजन्तः	सन्नन्तः	यङन्तः	यङ्लुगन्तः
३८२.	पनँ स्तुतौ	पन्	आ.	पानि पनायि	पिपनिष पिपनायिष	पम्पन्य	पम्पन्
३८३.	अनँ प्राणने	अन्	प.	आनि	अनिनिष	----	----
३८४.	ञिष्वपँ शये	स्वप्	प.	स्वापि	सुषुप्स	सोषुप्य	सास्वप्
३८५.	तपँ सन्तापे	तप्	प.	तापि	तितप्स	तातप्य	तातप्
३८६.	डुवपँ बीजसन्ताने	वप्	उ.	वापि	विवप्स	वावप्य	वावप्

छेदनेऽपि। बीजसन्तानः क्षेत्रे विकिरणं गर्भाधानं च। अयं छेदनेऽपि। केशान् वपति=छिनत्ति। अप्रमत्ता रक्षत तन्तुमेतं मा वः क्षेत्रे परबीजानि अवाप्सुः।

३८७.	शपँ आक्रोशे	शप्	उ.	शापि	शिशप्स	शाशप्य	शाशप्
३८८.	शपँ आक्रोशे	शप्	उ.	शापि	शिशप्स	शाशप्य	शाशप्

आक्रोशः विरुद्धानुध्यानम्।

३८९.	तपँ ऐश्वर्ये वा	तप्	आ.	तापि	तितप्स	तातप्य	तातप्

अस्मादैश्वर्येऽर्थे वा श्यन्, वात्मनेपदमिति केचित्। अन्यदा तु शब्विकरणः परस्मैपदी।

३९०.	क्रपँ कृपायां गतौ च	क्रप्	आ.	क्रपि	चिक्रपिष	चाक्रप्य	चाक्रप्
३९१.	जपँ व्यक्तायां वाचि	जप्	प.	जापि	जिजपिष	जञ्जप्य	जञ्जप्
३९२.	चपँ सान्त्वने	चप्	प.	चापि	चिचपिष	चाचप्य	चाचप्
३९३.	षपँ समवाये	सप्	प.	सापि	सिसपिष	सासप्य	सासप्

समवायः सम्बन्धः, सम्यगवबोधो वा।

३९४.	रपँ व्यक्तायां वाचि	रप्	प.	रापि	रिरपिष	रारप्य	रारप्
३९५.	लपँ व्यक्तायां वाचि	लप्	प.	लापि	लिलपिष	लालप्य	लालप्
३९६.	त्रपूँष् लज्जायाम्	त्रप्	आ.	त्रापि त्रपि	तित्रपिष तित्रप्स	तात्रप्य	तात्रप्

दलि, वलि, स्खलि, रणि, ध्वनि, त्रपि क्षपयश्चेति भोजः – भोजमते एते मितः। मित्त्वात् 'मितां ह्रस्वः' इति ह्रस्वे त्रपयति। अन्यमते अमित्त्वात्–त्रापयति।

३९७.	रफँ गतौ	रफ्	प.	राफि	रिरफिष	रारफ्य	रारफ्
३९८.	कबृँ वर्णे	कब्	आ.	काबि	चिकबिष	चाकब्य	चाकब्
३९९.	रभँ राभस्ये	रभ्	आ.	रम्भि	रिप्स	रारभ्य	रारभ्

राभस्यं शीघ्रीभावःरभसक्रिया वा।

क्र.	धातुः	नि.धातुः	पदम्	णिजन्तः	सन्नन्तः	यङन्तः	यङ्लुगन्तः
४००.	*डुलभँष् प्राप्तौ*	*लभ्*	*आ.*	लम्भि	लिप्स	लालभ्य	लालभ्
४०१.	जभीँ गात्रविनामे	जभ्	आ.	जम्भि	जिजम्भिष	जञ्जभ्य	जञ्जभ्
	गात्रस्य विनामः, मुखस्य वक्रीभवनम्। तन्द्रया मुखव्यादानं वा।						
४०२.	*यभँ मैथुने*	*यभ्*	*प.*	याभि	यियप्स	यायभ्य	यायभ्
४०३.	णभँ हिंसायाम्	नभ्	प.	नाभि	निनभिष	नानभ्य	नानभ्
४०४.	णभँ हिंसायाम्	नभ्	प.	नाभि	निनभिष	नानभ्य	नानभ्
४०५.	णभँ हिंसायाम्	नभ्	आ.	नाभि	निनभिष	नानभ्य	नानभ्

अभावे च। *नभन्तामन्यके समे। मन्त्रोऽयम्। मा भूवन्नन्यके सर्वे,* इति *निरुक्तम्।*

जनी जॄष् क्नसु रञ्जोऽमन्ताश्च *- जनी जॄष्, क्नसु, रञ्ज् अमन्ताश्च धातवो मितो भवन्ति। ४०६ इत्यतः ४३० इत्येते अमन्ताः। तेन 'मितां ह्रस्वः'* इति णौ *ह्रस्वः। गमयति।* रमयति। *भ्रमयति* इत्यादयः।

४०६.	*गम्लृँ गतौ*	*गम्*	*प.*	गमि	जिगमिष	जङ्गम्य	जङ्गम्
	गतिः गमनम्, ज्ञानम्, प्राप्तिः, मोक्षः।				संजिगांस		
४०७.	*णमँ प्रह्वत्वे शब्दे च*	*नम्*	*प.*	नमि	निनंस	नंनम्य	नंनम्
	प्रह्वत्वम् प्रणमनम्।			नामि			

ज्वल, ह्वल, ह्मल, नमामनुपसर्गाद्वा *- ज्वल, ह्वल, ह्मल, नम्, एतेऽनुपसर्गा वा मितः। तेन 'मितां ह्रस्वः'* इति *णौ वा ह्रस्वः। नमयति, नामयति। उपसर्गे नित्यं मित्त्वात् - परिणमयति। कथं तर्हि उन्नामयति? उन्नामं करोति* इति *घञन्ताद् णौ एतद्।*

४०८.	*यमँ उपरमे*	*यम्*	*प.*	यमि	यियंस	यंयम्य	यंयम्
	उपरमो *विरामः। निवृत्तिः।*			यामि			

यमोऽपरिवेषणे *- यमधातुः अपरिवेषणे मित् भवति - आयामयति, द्राघयति इत्यर्थः। परिवेषणे मिन्न भवति - यमयति ब्राह्मणान्, भोजयति इत्यर्थः। कथं तर्हि पर्यवसितं नियमयन्? नियमवत् शब्दात् तत्करोति तदाचष्टे इति णौ बोध्यम्। विन्मतोर्लुक् इति वतिप्रत्ययस्य लुक्।*

४०९.	*रमुँ क्रीडायाम्*	*रम्*	*आ.*	रमि	रिरंस	रंरम्य	रंरम्
	नायमुदित् इति माधवः।						
४१०.	भ्रमुँ अनवस्थाने	भ्रम्	प.	भ्रमि	बिभ्रमिष	बम्भ्रम्य	बम्भ्रम्
४११.	शमुँ उपशमे	शम्	प.	शमि	शिशमिष	शंशम्य	शंशम्
				शामि			

क्र.	धातुः	नि.धातुः	पदम्	णिजन्तः	सन्नन्तः	यङन्तः	यङ्लुगन्तः

शमो दर्शने - दैवादिकः शम उपशमे धातुर्दर्शनेऽर्थे मित् न भवति । निशामयति रूपम्, पश्यति इत्यर्थः । उपशमे मित् - शमयति । चुरादिगणस्य 'शम आलोचने' नान्ये मितोऽहेतौ इति अमित् । अतस्तेन - शामयते । निशामय तदुत्पत्तिं विस्तराद् गदतो मम । धातूनामनेकार्थत्वात् श्रवणे वृत्तिः ।

४१२.	तमुँ काङ्क्षायाम्	तम्	प.	तमि	तितमिष	तन्तम्य	तन्तम्
४१३.	दमुँ उपशमे	दम्	प.	दमि	दिदमिष	दन्दम्य	दन्दम्
४१४.	श्रमुँ तपसि खेदे च	श्रम्	प.	श्रमि	शिश्रमिष	शंश्रम्य	शंश्रम्

रजो विश्रामयन् राज्ञां धुर्यान् विश्रामयेति सः, इत्यत्र मितां ह्रस्वः इति व्यवस्थितविभाषाश्रयणात् ह्रस्वो न ।

४१५.	क्षमूँ सहने	क्षम्	प.	क्षमि	चिक्षमिष चिक्षंस	चङ्क्षम्य	चङ्क्षम्
४१६.	क्लमुँ ग्लानौ	क्लम्	प.	क्लमि	चिक्लमिष	चङ्क्लम्य	चङ्क्लम्
४१७.	भ्रमुँ चलने	भ्रम्	प.	भ्रमि	बिभ्रमिष	बम्भ्रम्य	बम्भ्रम्

घूर्णनम्, अटनं, भ्रान्तिर्वा ।

४१८.	क्षमूँष् सहने	क्षम्	आ.	क्षमि	चिक्षमिष चिक्षंस	चङ्क्षम्य	चङ्क्षम्
४१९.	कमुँ कान्तौ	कम्	आ.	कामि	चिकामयिष	----	----
					चिकमिष	चङ्कम्य	चङ्कम्

कान्तिः इच्छा । कामोऽभिलाषस्तर्षश्च इत्यमरः ।

न कमि अमि चमाम् - अमन्तोऽप्ययं न मित् । अतो मितां ह्रस्वः इति णिचि ह्रस्वो न । कामयते ।

४२०.	क्रमुँ पादविक्षेपे	क्रम्	प.	क्रमि	चिक्रमिष	चङ्क्रम्य	चङ्क्रम्

पादविक्षेपः - आक्रमणम्, संक्रमणं, लङ्घनम्, पादन्यासः उत्साहः, गतिशैघ्र्यं वा ।

कथं पुनः संक्रामयति इति ? 'मितां ह्रस्वः' इत्यत्र 'वा चित्तविरागे' इत्यस्माद् वा इति अनुवर्त्य व्यवस्थित- विभाषाश्रयणात् ।

४२१.	छमुँ इति केचित्	छम्	प.	छमि	चिच्छमिष	चञ्छम्य	चञ्छम्
४२२.	झमुँ इति केचित्	झम्	प.	झमि	जिझमिष	जञ्झम्य	जञ्झम्
	जिमुँ इति केचित्	जिम्		जेमि	जिजेमिष	जेजिम्य	जेजिम्

अदनं भोजनम् । तथा च जेमनमिति भोजने प्रयुज्जते ।

क्र.	धातुः	नि.धातुः	पदम्	णिजन्तः	सन्नन्तः	यङन्तः	यङ्लुगन्तः
४२३.	जमुँ अदने	जम्	प.	जमि	जिजमिष	जञ्जम्य	जञ्जम्
४२४.	आङः चमुँ अदने	चम्	प.	आचामि	आचिचमिष	आचञ्चम्य	आचञ्चम्
४२५.	चमुँ भक्षणे	चम्	प.	चामि	चिचमिष	चञ्चम्य	चञ्चम्

अदनं भक्षणम्। ***न कमि अमि चमाम्*** *- अमन्तावप्येतौ न मितौ। अतो मितां ह्रस्वः इति णिचि ह्रस्वो न। आचामयति। चामयति।*

क्र.	धातुः	नि.धातुः	पदम्	णिजन्तः	सन्नन्तः	यङन्तः	यङ्लुगन्तः
४२६.	षमँ अवैकल्ये	सम्	प.	समि	सिसमिष	संसम्य	संसम्
४२७.	ष्टमँ अवैकल्ये	स्तम्	प.	स्तमि	तिस्तमिष	तंस्तम्य	तंस्तम्
४२८.	स्यमुँ शब्दे	स्यम्	प.	स्यमि	सिस्यमिष	सेसिम्य	संस्यम्
४२९.	टुवमँ उद्गिरणे	वम्	प.	वमि	विवमिष	वंवम्य	वंवम्
	उद्गिरणम् उद्वमनम्।			वामि			

ग्ला-स्ना-वनु-वमां च - अनुपसर्गादेषां मित्त्वं वा स्यात्। वमयति, वामयति। सोपसर्गात् नित्यं - संवमयति।

क्र.	धातुः	नि.धातुः	पदम्	णिजन्तः	सन्नन्तः	यङन्तः	यङ्लुगन्तः
४३०.	द्रमँ गतौ	द्रम्	प.	द्रमि	दिद्रमिष	दन्द्रम्य	दन्द्रम्
४३१.	अमँ गत्यादिषु	अम्	प.	आमि	अमिमिष	----	----

गतौ, शब्दे, सम्भक्तौ इत्यर्थः। ***न कमि अमि चमाम्*** *- अमन्तोऽप्ययं न मित्। अतो मितां ह्रस्वः इति णिचि ह्रस्वो न। आमयति।*

क्र.	धातुः	नि.धातुः	पदम्	णिजन्तः	सन्नन्तः	यङन्तः	यङ्लुगन्तः
४३२.	अयँ गतौ	अय्	आ.	आयि	अयियिष	----	----
४३३.	दयँ दानगतिरक्षण-हिंसादानेषु	दय्	आ.	दायि	दिदयिष	दादय्य	दादय्
४३४.	वयँ गतौ	वय्	आ.	वायि	विवयिष	वावय्य	वावय्
४३५.	पयँ गतौ	पय्	आ.	पायि	पिपयिष	पापय्य	पापय्
४३६.	मयँ गतौ	मय्	आ.	मायि	मिमयिष	मामय्य	मामय्
४३७.	चयँ गतौ	चय्	आ.	चायि	चिचयिष	चाचय्य	चाचय्
४३८.	तयँ गतौ	तय्	आ.	तायि	तितयिष	तातय्य	तातय्
४३९.	णयँ गतौ	नय्	आ.	नायि	निनयिष	नानय्य	नानय्
४४०.	रयँ गतौ, लय च	रय्	आ.	रायि	रिरयिष	रारय्य	रारय्
४४१.	व्ययँ गतौ	व्यय्	उ.	व्यायि	विव्ययिष	वाव्यय्य	वाव्यय्
४४२.	हयँ गतौ	हय्	प.	हायि	जिहयिष	जाहय्य	जाहय्

क्र.	धातुः	नि.धातुः	पदम्	णिजन्तः	सन्नन्तः	यङन्तः	यङ्लुगन्तः
४४३.	ञित्वराँ सम्भ्रमे	त्वर्	आ.	त्वरि	तित्वरिष	तात्वर्य	तात्वर
	संभ्रमः शीघ्रता।						
४४४.	ज्वरँ रोगे	ज्वर्	प.	ज्वरि	जिज्वरिष	जाज्वर्य	जाज्वर्
४४५.	चरँ गत्यर्थः	चर्	प.	चारि	चिचरिष	चञ्चूर्य	चञ्चुर्
	चरतिर्भक्षणेऽपि इति केचित्। गतिर्गमनम्। भक्षणं भोजनम्।						
४४६.	त्सरँ छद्मगतौ	त्सर्	प.	त्सारि	तित्सरिष	तात्सर्य	तात्सर्
४४७.	क्मरँ हूर्च्छने	क्मर्	प.	क्मारि	चिक्मरिष	चाक्मर्य	चाक्मर्
	हूर्च्छनम्-कौटिल्यम्।						
४४८.	क्षरँ सञ्चलने	क्षर्	प.	क्षारि	चिक्षरिष	चाक्षर्य	चाक्षर्
४४९.	अलँ भूषणपर्याप्तिवारणेषु	अल्	प.	आलि	अलिलिष	----	----
४५०.	ञिफलाँ विशरणे	फल्	प.	फालि	पिफलिष	पम्फुल्य	पम्फुल्
	विशरणम् अवयवविभागः।						
४५१.	फलँ निष्पत्तौ	फल्	प.	फालि	पिफलिष	पम्फुल्य	पम्फुल्
	निष्पत्तिः पूर्णता, सिद्धिः।						
४५२.	चलँ कम्पने	चल्	प.	चालि चलि	चिचलिष	चाचल्य	चाचल्
१८९०.	सारँ दौर्बल्ये (अदन्तः)	सार	उ.	सारि	सिसारयिष	---	---
१८९१.	पार (अदन्तः)	पार	उ.	पारि	पिपारयिष	---	---
१८९२.	तीर कर्मसमाप्तौ (अदन्तः)	तीर	उ.	तीरि	तितीरयिष	---	---
१८९३.	सूत्र वेष्टने (अदन्तः)	सूत्र	उ.	सूत्रि	सुसूत्रयिष	सोसूत्र्य	सोसूत्रि
१८९४.	कुमार क्रीडायाम् (अदन्तः)	कुमार	उ.	कुमारि	चुकुमारयिष	---	---
१८९५.	श्वभ्रँ गत्याम्	श्वभ्र्	उ.	श्वभ्रि	शिश्वभ्रयिष	---	---
१८९६.	गूरँ उद्यमने (आकु०)	गूर्	आ.	गूरि	जुगूरयिष	---	---
१८९७.	शूर (आग०, अदन्तः)	शूर	आ.	शूरि	शुशूरयिष	---	---
१८९८.	वीर विक्रान्तौ (आग०) (अदन्तः)	वीर	आ.	वीरि	विवीरयिष	---	---
१८९९.	सत्र सन्तानक्रियायाम् (आग०, अदन्तः)	सत्र	आ.	सत्रि	सिसत्रयिष	---	---
१९००.	यत्रिँ संकोचे	यन्त्र्	उ.	यन्त्रि	यियन्त्रयिष	---	—
१९०१.	तत्रिँ कुटुम्बधारणे (आकु०)	तन्त्र्	आ.	तन्त्रि	तितन्त्रयिष	---	---

क्र.	धातुः	नि.धातु	पद	णिजन्त	सन्नन्त	यङन्त	यङ्लुगन्त
१९०२.	मत्रिँ गुप्तपरिभाषणे (आकु०)	मन्त्र्	आ.	मन्त्रि	मिमन्त्रयिष	---	---
१९०३.	कुद्रिँ अनृतभाषणे	कुन्द्र्	उ.	कुन्द्रि	चुकुन्द्रयिष	---	---
१९०४.	पूलँ सङ्घाते पूर्णँ इत्येके, पुण इत्यन्ये।	पूल्	उ.	पूलि	पुपूलयिष	---	---
१९०५.	मूलँ रोहणे	मूल्	उ.	मूलि	मुमूलयिष	---	---
१९०६.	पालँ रक्षणे	पाल्	उ.	पालि	पिपालयिष	---	---
१९०७.	स्थूल परिबृंहणे (आग०) (अदन्तः)	स्थूल	आ.	स्थूलि	तुस्थूलयिष	---	---
१९०८.	शील उपधारणे (अदन्तः) *उपधारणम् अभ्यासः।*	शील	उ.	शीलि	शिशीलयिष	---	---
१९०९.	वेल कालोपदेशे, काल इति पृथग् धातुरित्येके (अदन्तः)	वेल	उ.	वेलि	विवेलयिष	---	---
१९१०.	पल्यूल लवनपवनयोः (अदन्तः)	पल्यूल	उ.	पल्यूलि	पिपल्यूलयिष	---	---
१९११.	षान्त्वँ सामप्रयोगे	सान्त्व	उ.	सान्त्वि	सिसान्त्वयिष	---	---
१९१२.	भूषँ अलङ्करणे	भूष्	उ.	भूषि	बुभूषयिष	---	---
१९१३.	लूषँ हिंसायाम्	लूष्	उ.	लूषि	लुलूषयिष	---	---
१९१४.	गवेष मार्गणे (अदन्तः)	गवेष	उ.	गवेषि	जिगवेषयिष	---	---
१९१५.	लक्षँ दर्शनाङ्कनयोः	लक्ष्	उ.	लक्षि	लिलक्षयिष	---	---
१९१६.	लक्षँ आलोचने (आकु०)	लक्ष्	आ.	लक्षि	लिलक्षयिष	---	---
१९१७.	पक्षँ परिग्रहे	पक्ष्	उ.	पक्षि	पिपक्षयिष	---	---
१९१८.	यक्षँ पूजायाम् (आकु०)	यक्ष्	आ.	यक्षि	यियक्षयिष	---	---
१९१९.	भक्षँ अदने	भक्ष्	उ.	भक्षि	बिभक्षयिष	---	---
१९२०.	म्रक्षँ म्लेच्छने *म्लेच्छनम् अपशब्दः। म्रक्षणेऽप्ययम्। तच्च तैलादिना अभ्यञ्जनम्।*	म्रक्ष्	उ.	म्रक्षि	मिम्रक्षयिष	---	---
१९२१.	पुंसँ अभिवर्धने	पुंस्	उ.	पुंसि	पुपुंसयिष	---	---

क्र.	धातुः	नि.धातु	पद	णिजन्त	सन्नन्त	यङन्त	यङ्लुगन्त
१९२२.	धूसँ कान्तिकरणे	धूस्	उ.	धूसि	दुधूसयिष	---	---
१९२३.	ब्रूसँ हिंसायाम्	ब्रूस्	उ.	ब्रूसि	बुब्रूसयिष	---	---
१८२४.	भर्त्सँ तर्जने (आकु०)	भर्त्स्	आ.	भर्त्सि	बिभर्त्सयिष	---	---
१९२५.	कुत्सँ अवक्षेपणे (आकु०)	कुत्स्	आ.	कुत्सि	चुकुत्सयिष	---	--
१९२६.	वास उपसेवायाम् (अदन्तः)	वास	उ.	वासि	विवासयिष	---	---
१९२७.	निवास आच्छादने (अदन्तः)	निवास	उ.	निवासि	निनिवासयिष	---	---
१९२८.	अंस समाघाते (अदन्तः)	अंस	उ.	अंसि	अंसिसयिष	---	---
१९२९	बर्हँ हिंसायाम्	बर्ह्	उ.	बर्हि	बिबर्हयिष	---	---
	केचिदिह गर्ज, गर्द शब्दे, गर्ध अभिकाङ्क्षायाम्, इति पठन्ति।						
१९३०.	अर्हँ पूजायाम्	अर्ह्	उ.	अर्हि	अर्जिहयिष	---	---

कण्ड्वादयः

क्र.	धातुः	नि.धातु	पद	णिजन्त	सन्नन्त	यङन्त	यङ्लुगन्त
१९३१.	एला विलासे	एला	प.	एलायि	एलायियिष	---	---
१९३२.	केला विलासे	केला	प.	केलायि	केलायियिष	---	---
१९३३.	खेला विलासे इला इत्येके	खेला	प.	खेलायि	खलायियिष	---	---
१९३४.	लेखा विलासे स्खलने च अदन्तोऽयमित्येके।	लेखा	प.	लेखायि	लेखायियिष	---	---
१९३५.	रेखा श्लाघासादनयोः	रेखा	प.	रेखायि	रेखायियिष	---	---
१९३६.	लेला दीप्तौ	लेला	प.	लेलायि	लेलायियिष	---	---
१९३७.	मेधा आशुग्रहणे	मेधा	प.	मेधायि	मेधायियिष	---	---
१९३८.	महीङ् पूजायाम्	मही	आ.	महीयि	महीयियिष	---	---
१९३९.	हृणीङ् रोषणे लज्जायाम् च	हृणी	आ.	हृणीयि	हृणीयियिष	---	---
१९४०.	मन्तु अपराधे	मन्तु	प.	मन्तूयि	मन्तूयियिष	---	---

चन्द्रस्तु ञितमाह, तेन आत्मनेपदमपि।

क्र.	धातुः	नि.धातु	पद	णिजन्त	सन्नन्त	यङन्त	यङ्लुगन्त
१९४१.	वल्गु पूजामाधुर्ययोः	वल्गु	प.	वल्गूयि	वल्गूयियिष	---	---
१९४२.	असुँ उपतापे	अस्	प.	असूयि	असूयियिष	---	---
	असू असूञ् इत्येके	असू	उ.	असूयि	असूयियिष	---	---
१९४३.	कण्डूञ् गात्रविघर्षणे	कण्डू	उ.	कण्डूयि	कण्डूयियिष	---	---
१९४४.	सुखँ तत्क्रियायाम्	सुख	प.	सुख्यि	सुख्यियिष	---	---
१९४५.	दुःखँ तत्क्रियायाम्	दुःख	प.	दुःखि	दुःख्यियिष	---	---
१९४६.	इरज् ईर्ष्यायाम्	इरज्	प.	इरज्यि	इरज्यियिष	---	---
१९४७.	भिषज् चिकित्सायाम्	भिषज्	प.	भिषज्यि	भिषज्यियिष	---	---
१९४८.	**भिष्णज्** उपसेवायाम्	भिष्णज्	प.	भिष्णज्यि	भिणज्यियिष	---	---
१९४९.	लिटँ अल्पकुत्सनयोः	लिट्	प.	लिट्यि	लिट्यियिष	---	---
१९५०.	लाटँ जीवने	लाट्	प.	लाट्यि	लाट्यियिष	---	---
१९५१.	लेट् धौर्त्ये स्वप्ने पूर्वाभावे च। दीप्तावित्येके।	लेट्	प.	लेट्यि	लेट्यियिष	---	---
१९५२.	लोट् धौर्त्ये स्वप्ने पूर्वाभावे च। दीप्तावित्येके।	लोट्	प.	लोट्यि	लोट्यियिष	---	---
१९५३.	गद्गदँ वाक्स्खलने	गद्गद	प.	गद्गद्यि	गद्गद्यियिष	---	---
१९५४.	अगदँ नीरोगत्वे	अगद	प.	अगद्यि	अगद्यियिष	---	---
१९५५.	वेदँ धौर्त्ये स्वप्ने च	वेद	प.	वेद्यि	वेद्यियिष	---	---
१९५६.	मगधँ परिवेष्टने	मगध	प.	मगध्यि	मगध्यियिष	---	---
१९५७.	इषुधँ शरधारणे	इषुध	प.	इषुध्यि	इषुध्यियिष	---	---
१९५८.	कुषुभँ क्षेपे	कुषुभ	प.	कुषुभ्यि	कुषुभ्यियिष	---	---
१९५९.	तरणँ गतौ	तरण	प.	तरण्यि	तरण्यियिष	---	---
१९६०.	चरणँ गतौ	चरण	प.	चरण्यि	चरण्यियिष	---	---
१९६१.	वरणँ गतौ	वरण	प.	वरण्यि	वरण्यियिष	---	---
१९६२	चुरणँ चौर्ये	चुरण	प.	चुरण्यि	चुरण्यियिष	---	---

क्र. धातुः	नि.धातु	पद	णिजन्त	सन्नन्त	यङन्त	यङ्लुगन्त
१९६३. तुरणँ त्वरायाम्	तुरण	प.	तुरण्यि	तुरण्यियिष	---	---
१९६४. भुरणँ धारणपोषणयोः	भुरण	प.	भुरण्यि	भुरण्यियिष	---	---
१९६५. सपरँ पूजायाम्	सपर	प.	सपर्यि	सपर्यियिष	---	---
१९६६. अररँ आराकर्मणि	अरर	प.	अरर्यि	अरर्यियिष	---	---
१९६७. अम्बरँ संवरणे	अम्बर	प.	अम्बर्यि	अम्बर्यियिष	---	---
१९६८. संवरँ संवरणे	संवर	प.	संवर्यि	संवर्यियिष	---	---
१९६९. इरँञ् ईर्ष्यायाम्	इर्	उ.	ईर्यि	ईर्यियिष	---	---
१९७०. इरस् ईर्ष्यायाम्	इरस्	प.	इरस्यि	इरस्यियिष	---	---
१९७१. उषस् प्रभातीभावे	उषस्	प.	उषस्यि	उषस्यियिष	---	---
१९७२. तन्तस् दुःखे	तन्तस्	प.	तन्तिस्यि	तन्तिस्यियिष	--	---
१९७३. पम्पस् दुःखे	पम्पस्	प.	पम्पस्यि	पम्पस्यियिष	---	---
१९७४. द्रवस् परितापपरिचरणयोः	द्रवस्	प.	द्रवस्यि	द्रवस्यियिष	---	---
१९७५. तिरस् अन्तर्धौ	तिरस्	प.	तिरस्यि	तिरस्यियिष	---	---
१९७६. उरस् बलार्थः	उरस्	प.	उरस्यि	उरस्यियिष	---	---
१९७७. पयस् प्रसृतौ	पयस्	प.	पयस्यि	पयस्यियिष	---	---
१९७८. संभूयस् प्रभूतभावे	संभूयस्	प.	सम्भूयस्यि	सम्भूयस्यियिष	---	---

नामधातवः

धातवो द्विविधाः। औपदेशिका, आतिदेशिकाश्च। पाणिनीये धातुपाठे पठिता औपदेशिकाः। सनाद्यन्ता आतिदेशिकाः।

अष्टाध्याय्यां 'गुप्-तिज्-किद्भ्यः सन् ३.१.४' इत्यत आरभ्य 'सनाद्यन्ता धातवः ३.१.३२' इत्यन्तैः सूत्रैर्विहिताः सन्, क्यच् ,काम्यच्, क्यङ्, क्यष्, क्विप्, यङ्, ईयङ्, यक्, आय, णिच्, णिङ्, एते द्वादश प्रत्ययाः सनादयः।

अत्र क्विप्प्रत्ययस्तु वार्तिकोक्तः। अन्ये एकादश प्रत्ययाः सूत्रोक्ताः। एते प्रत्यया येषामन्ते भवन्ति, तेषामपि धातुसंज्ञा भवति, 'सनाद्यन्ता धातवः' इत्यनेन सूत्रेण।

एषां मध्ये क्यच् ,काम्यच्, क्यङ्, क्यष्, क्विप्, इमे प्रत्ययाः विविधेष्वर्थेषु सुबन्तेभ्य

क्र.	धातुः	नि.धातु	पद	णिजन्त	सन्नन्त	यङन्त	यङ्लुगन्त

एव भवन्ति, न धातुभ्यः।

णिच्, णिङ्, एतौ प्रत्ययौ क्वचिद् धातुभ्यः, क्वचिच्च सुबन्तेभ्यो भवतः। यथा - 'पुच्छभाण्डचीवराण्णिङ् ३.१.२०' अयं णिङ् प्रत्ययः सुबन्तेभ्यो भवति। किन्तु 'कमेर्णिङ् ३.१.३०' अयं णिङ् प्रत्ययो धातोर्भवति।

'मुण्ड-मिश्र-श्लक्ष्ण-लवण-व्रत-वस्त्र-हल-कल-कृत-तूस्तेभ्यो णिच् ३.१.२१' अयं णिच् प्रत्ययः सुबन्तेभ्यो भवति। किन्तु 'सत्याप-पाश-रूप-वीणा-तूल-श्लोक-सेना-लोम-त्वच-वर्म-वर्ण-चूर्ण-चुरादिभ्यो णिच् ३.१.३०' अयं णिच् प्रत्ययः सत्यापपाशादिभ्यः सुबन्तेभ्यो भवति, अथ च चुरादिभ्यो धातुभ्योऽपि भवति।

इत्थञ्च सुबन्तेभ्यः क्यच्, काम्यच्, क्यङ्, क्यष्, क्विप्, णिच्, णिङ्, एते सप्त प्रत्यया भवन्ति।

अत्रावधेयम् - वस्तुतस्तु 'सुप आत्मनः क्यच् ३.१.८' इत्यनेन सूत्रेण इमे प्रत्ययाः सुबन्तेभ्यो विधीयन्ते। किन्तु 'सुपो धातुप्रातिपदिकयोः २.४.७१' इत्यनेन सूत्रेण सुपो लुकि तत्र प्रातिपदिकेभ्य एव दृश्यन्ते। प्रातिपदिकान्येव नामपदेनाभिधीयन्ते। एभिः सप्तभिः प्रत्ययैर्युक्तानि नामान्येव धातुत्वेन पर्यवस्यन्ति। अत इमे नामधातव इति व्यपदिश्यन्ते।

सनाद्यन्ता धातवः - सन्, क्यच् ,काम्यच्, क्यष्, क्यङ्, क्विप्, णिङ्, ईयङ्, णिच्, यक्, आय, यङ्, इमे सनादयो अन्ते येषां ते सनाद्यन्ता धातुसंज्ञका भवन्ति।

धातुत्वादेभ्यः सर्वे लकाराः, कृत्प्रत्ययाश्च भवन्ति। तत्र लट्, लोट्, लङ्, विधिलिङ्, एषु लकारेषु धातुभ्यः शप् भवति।

कर्तरि शप् - कर्त्रर्थके सार्वधातुके परतो धातोः शप् भवति। यथा -

कृष्ण इवाचरति कृष्णति - कृष्ण + क्विप् = कृष्ण। अयं नामधातुः। अस्मात् लटि, तिपि - कृष्ण + ति। कर्तरि शप् इति शपि - कृष्ण + शप् + ति - कृष्ण + अ + ति - अतो गुणे इति पररूपे - कृष्ण् + अ + ति - कृष्णति।

कृष्णति	कृष्णतः	कृष्णन्ति
कृष्णसि	कृष्णथः	कृष्णथ
कृष्णामि	कृष्णावः	कृष्णामः

एवमेव नामधातुभ्यः सर्वेषु सार्वधातुकप्रत्ययेषूह्यम्।

इदानीम् अकारान्त-इकारान्त-उकारान्त-ऋकारान्त-इति प्रातिपदिकानामन्त्य-वर्णक्रममाश्रित्य नामधातुनिष्पादनविधिः प्रतिपाद्यते। अनेनात्र ये नोक्ता तेऽपि निष्पाद-

क्र.	धातुः	नि.धातु	पद	णिजन्त	सन्नन्त	यङन्त	यङ्लुगन्त

यिष्यन्ते।

क्यच्-प्रत्ययः - कर्मवाचकात् सुबन्तात्

शेषात् कर्तरि परस्मैपदम् - क्यच्प्रत्ययान्तेभ्यो धातुभ्यः शेषत्वात् परस्मैपदिनः प्रत्यया भवन्ति।

सुप आत्मनः क्यच् (३.१.८) - इषिकर्मण एषितुरेवात्मसम्बन्धिनः सुबन्तादिच्छायामर्थे वा क्यच् प्रत्ययो भवति।

यदा कश्चन कर्तात्मनः कृत इच्छां करोति, न तु अन्यस्य कस्यचन कृते, तदा तस्या इच्छायाः कर्मवाचकात् सुबन्तात् क्यच् प्रत्ययो वा भवति। यथा - देवदत्त आत्मनः पुत्रम् इच्छति = पुत्रीयति (=देवदत्त अपने लिये पुत्र की इच्छा करता है)। अत्रेच्छायाः कर्ता देवदत्तः। तस्येच्छायाः कर्म पुत्रम्' इति। अस्मात् कर्मवाचकात् सुबन्तात् क्यच् प्रत्ययो वा भवति। पुत्र + अम् + क्यच्। अत्र 'सुपो धातुप्रातिपदिकयोः २.४.७१' इत्यनेन सूत्रेण सुपो लुग्भवति। पुत्र + य = पुत्रीय = देवदत्त अपने लिये पुत्र की इच्छा करता है।

अस्य लटि रूपाणि -

पुत्रीयति	पुत्रीयतः	पुत्रीयन्ति
पुत्रीयसि	पुत्रीयथः	पुत्रीयथ
पुत्रीयामि	पुत्रीयावः	पुत्रीयामः

छन्दसि परेच्छायामिति वक्तव्यम् - मा त्वा वृका अघायवो विदन्।

उपमानादाचारे - उपमानवाचिनः कर्मणः सुबन्तात् आचारेऽर्थे वा क्यच् प्रत्ययो भवति। यथा - गुरुः पुत्रम् इव आचरति शिष्यम् = गुरुः शिष्यं पुत्रीयति (=गुरु शिष्य में पुत्र जैसा आचरण करता है।) अत्र याऽऽचरणक्रिया वर्तते, तस्याः कर्मास्ति - शिष्यम् इति। अस्योपमानं वर्तते पुत्रम् इति। अस्मादेवोपमानवाचिनः सुबन्तात् कर्मणो वा क्यच् प्रत्ययो भवति।

क्यच्-प्रत्ययः - अधिकरणवाचकात् सुबन्तात्

अधिकरणाच्चेति वक्तव्यम् (वा.) - उपमानवाचिनः अधिकरणात् सुबन्तात् आचारेऽर्थे वा क्यच् प्रत्ययो भवति।

यथा - भिक्षुः कुट्याम् प्रासादीयति = भिक्षु कुटी में महल जैसा रहता है।

अत्र याऽऽचरणक्रिया वर्तते, तस्या अधिकरणमस्ति - कुटी इति। अस्या उपमानं वर्तते प्रासाद इति। अस्मादेवोपमानवाचिनः अधिकरणात् सुबन्तात् वा क्यच् प्रत्ययो भवति।

क्र.	धातुः	नि.धातु	पद	णिजन्त	सन्नन्त	यङन्त	यङ्लुगन्त

प्रासाद + य = प्रासादीय। अयं क्यच्प्रत्ययान्तो नामधातुः। एवमेव -

भिक्षुः प्रासादे कुटीयति = भिक्षु महल में कुटी जैसा रहता है।

देवदत्तः मञ्चे पर्यङ्कीयति = देवदत्त मञ्च पर पलङ्ग जैसा रहता है।

क्यच्-प्रत्ययनिषेधः

मान्तप्रकृतिकसुबन्तादव्ययाच्च क्यच् न - मकारान्तेभ्यः, अव्ययसंज्ञकेभ्यश्च प्रातिपदिकेभ्यः क्यच् प्रत्ययो न भवति। अन्ये प्रत्ययास्तु काम्यच्, क्यङ् इत्यादयो भवन्ति।

मकारान्तात् - किम् इच्छति।

अव्ययात् - स्वरिच्छति।

क्यच् प्रत्यये सामान्यकार्यम्

१. क्यच् प्रत्यये अकारस्य, आकारास्य च ईकारो भवति

क्यचि च - अकारस्य, आकारस्य च 'ई' भवति क्यचि।

अकारान्तेभ्यः प्रातिपदिकेभ्यः -	पुत्र -	पुत्रीय -	पुत्रीयति
	घट -	घटीय -	घटीयति
	पट -	पटीय -	पटीयति
आकारान्तेभ्यः प्रातिपदिकेभ्यः -	खट्वा -	खट्वीय -	खट्वीयति
	माला -	मालीय -	मालीयति
	शाला -	शालीय -	शालीयति

अस्यापवादाः -

अशनायउदन्यधनाया बुभुक्षापिपासागर्धेषु - एष्वर्थेष्वेते निपात्यन्ते -

बुभुक्षितः अशनम् इच्छति	- अशना	=	अशनायति
पिपासितः उदकम् इच्छति	- उदन्य	=	उदन्यति
लुब्धो धनमिच्छति	- धनाय	=	धनायति

इच्छासामान्येऽर्थे 'क्यचि च' इति ईकारो भवति -

अशनमिच्छति	- अशनीय	=	अशनीयति।
उदकमिच्छति	- उदकीय	=	उदकीयति।
धनमिच्छति	- धनीय	=	धनीयति।

अश्ववृषयोर्मैथुनेच्छायाम् - 'असुक्-अस्' आगमो भवति।

वडवा अश्वस्यति = मैथुनाय अश्वम् इच्छति।

क्र.	धातुः	नि.धातु	पद	णिजन्त	सन्नन्त	यङन्त	यङ्लुगन्त

गौः वृषस्यति = मैथुनाय वृषम् इच्छति।

सर्वप्रातिपदिकानां क्यचि लालसायां सुगसुकौ -

उत्कटेच्छायां सर्वप्रातिपदिकानां क्यचि लालसायां सुक्, असुक् आगमौ भवतः।

इच्छा = इच्छासामान्यम्। लालसा = उत्कटेच्छा।

सुगागमे -

बालः क्षीरस्यति = बालक दूध की लालसा करता है।

बालः दधिष्यति = बालक दधि की लालसा करता है।

देवदत्तः मधुष्यति = देवदत्त मधु की लालसा करता है।

असुगागमे - बालः दध्यस्यति। दधि + अस् + य = दध्यस्य - दध्यस्यति।

एवमेव - उष्ट्रः लवणस्यति। देवदत्तः मध्वस्यति।

नमोवरिवश्चित्रङः क्यच् - 'पूजां करोति' इत्यस्मिन्नर्थे नमसः, 'परिचर्यां करोति' इत्यस्मिन्नर्थे वरिवसः, 'आश्चर्यं करोति' इत्यस्मिन्नर्थे चित्रङः वा क्यच् प्रत्ययो भवति।

नमस् - देवान् नमस्यति।

वरिवस् - गुरून् वरिवस्यति।

चित्रङ् - चित्रीयते।

क्यच्च्व्योश्च - हलः परस्यापत्यस्य तद्धितयकारस्य लोपो भवति क्यचि, च्वौ च। यथा - गार्ग्य + क्यच् - गार्ग + य - क्यचि चेति अकारस्य ईकारे - गार्गी + य - गार्गीय = गार्गीयति। एवमेव -वात्स्य - वात्सीयति इत्यादयः।

२. इकारस्य, ईकारस्य, उकारस्य, ऊकारस्य च दीर्घो भवति

अकृत्सार्वधातुकयोर्दीर्घः - अजन्ताङ्गस्य दीर्घो भवति कृद्भिन्ने, सार्वधातुकभिन्ने यकारे परतः।

कविम् इव आचरति मूर्खम् = कवीयति (कवि + क्यच्)

नदीम् इव आचरति पल्वलम् = नदीयति (नदी + क्यच्)

गुरुम् इव आचरति ब्राह्मणम् = गुरूयति (गुरु + क्यच्)

विष्णुम् इव आचरति ब्राह्मणम् = विष्णूयति (कवि + क्यच्)

३. ऋकारस्य स्थाने रीङ्=री भवति

रीङ् ऋतः - ऋकारान्ताङ्गस्य रीङ् भवति कृद्भिन्ने, सार्वधातुकभिन्ने यकारे,

च्वौ च परतः। मातृ + क्यच् - मात् + री + य = मात्रीय।

मातरम् इव आचरति धात्रीम् = मात्रीयति (मातृ + क्यच्)

जो माता नहीं है, उसके साथ माता जैसा आचरण करता है।

भ्रातरम् इव आचरति मित्रम् = भ्रात्रीयति (भ्रातृ + क्यच्)

जो भ्राता नहीं है, उसके साथ भ्राता जैसा आचरण करता है।

कर्तारम् इव आचरति अकर्तारम् = कर्त्रीयति (कर्तृ + क्यच्)

जो कर्ता नहीं है, उसके साथ कर्ता जैसा आचरण करता है।

४. ओकारस्य स्थाने 'अव्' भवति औकारस्य स्थाने 'आव्' भवति

वान्तो यि प्रत्यये – ओ, औ अनयोः स्थाने अव्, आव् इत्यादेशौ भवतः, यकारादौ प्रत्यये परतः। गो + क्यच् - गव् + य - गव्य = गव्यति। जो गाय नहीं है, उसके साथ गाय जैसा आचरण करता है।

नौ + क्यच् - नाव् + य - नाव्य = नाव्यति। जो नाव नहीं है, उसके साथ नाव जैसा आचरण करता है।

५. प्रातिपदिकान्तस्य नकारस्य लोपो भवति

नलोपः प्रातिपदिकान्तस्य – प्रातिपदिकसंज्ञकं यत्पदं, तदन्तस्य लोपो भवति।

राजन् + क्यच् / नलोपे कृते - राज + य / क्यचि च इति अकारस्य ईकारे - राजीय = राजीयति।

करिन् + क्यच् / नलोपे कृते - करि + य / अकृत्सार्वधातुकयोर्दीर्घः इति दीर्घे - करी + य - करीय = करीयति।

६. रेफान्तप्रातिपदिकान्तस्य उपधायाः इको दीर्घो भवति

गिर् + क्यच् = गीर्यति। पुर् + क्यच् = पूर्यति।

शेषहलन्तप्रातिपदिकानां न भवति किमपि

धनुष् + क्यच् / धनुष् + य - धनुष्य = धनुष्यति। हविष् + क्यच् - हविष्यति वाच् + क्यच् - वाच्यति / समिध् + क्यच् - समिध्यति, इत्यादयः।

काम्यच्-प्रत्ययः - कर्मवाचकात् सुबन्तात्

शेषात् कर्तरि परस्मैपदम् – काम्यच्प्रत्ययान्तेभ्यो धातुभ्यः परस्मैपदिनः प्रत्यया भवन्ति।

काम्यच्च (३.१.८) – इषिकर्मण एषितुरेवात्मसम्बन्धिनः सुबन्तादिच्छायामर्थे वा काम्यच् प्रत्ययो भवति।

यदा कश्चन कर्तात्मन: कृत इच्छां करोति, न तु अन्यस्य कस्यचन कृते, तदा तस्या इच्छाया: कर्मवाचकात् सुबन्तात् काम्यच् प्रत्ययो वा भवति। यथा - देवदत्त: आत्मन: पुत्रम् इच्छति = पुत्रकाम्यति (=देवदत्त अपने लिये पुत्र की इच्छा करता है)। अत्रेच्छाया: कर्ता देवदत्त:। तस्येच्छाया: कर्म 'पुत्रम्' इति। अस्मात् कर्मवाचकात् सुबन्तात् काम्यच्प्रत्ययो वा भवति। पुत्र + अम् + काम्यच्।

अत्र 'सुपो धातुप्रातिपदिकयो: २.४.७१' इत्यनेन सूत्रेण सुपो लुग्भवति। पुत्र + काम्य = पुत्रकाम्य। अयं काम्यच्प्रत्ययान्तो नामधातु:। देवदत्त: पुत्रकाम्यति = देवदत्त अपने लिये पुत्र की इच्छा करता है।

अयं काम्यच् प्रत्ययो मान्तेभ्योऽव्ययेभ्योऽपि प्रातिपदिकेभ्यो भवति।

किम् इच्छति	-	किङ्काम्यति	इदम् इच्छति	-	इदंकाम्यति।
स्व: इच्छति	-	स्व:काम्यति	यश: इच्छति	-	यश:काम्यति।
सर्पि: इच्छति	-	सर्पिष्काम्यति			

काम्यच्प्रत्यये सामान्यकार्यम्

काम्यच्प्रत्यये - नलोप: प्रातिपदिकान्तस्येति नकारस्य लोपो भवति। रेफस्य विसर्गो भवति। इण उत्तरस्य विसर्गस्य षकारो भवति। अन्ये वर्णास्तथैव भवन्ति।

क्यङ् प्रत्यय: - कर्तृवाचकात् सुबन्तात्

अनुदात्तङित आत्मनेपदम् - ङित्त्वात् क्यङन्तेभ्यो धातुभ्य आत्मनेपदं भवति।

कर्तु: क्यङ् सलोपश्च - कर्तु: यदुपमानं, तद्वाचकात् सुबन्तात् क्यङ् प्रत्ययो भवति। श्येन इव आचरति काक: श्येनायते। कृष्ण इव आचरति गोपाल: कृष्णायते।

क्यङ् प्रत्यये सामान्यकार्यम्

१. अकारस्य, आकारस्य, इकारस्य, ईकारस्य, उकारस्य, ऊकारस्य च दीर्घो भवति

अकृत्सार्वधातुकयोर्दीर्घ: - अजन्ताङ्गस्य दीर्घो भवति कृद्भिन्ने, सार्वधातुकभिन्ने यकारे परत:।

अकारस्य दीर्घ: - श्येन इव आचरति काक: श्येनायते - श्येन + क्यङ् / श्येन + य / अकृत्सार्वधातुकयोर्दीर्घ: इति दीर्घे - श्येनाय = श्येनायते।

कृष्ण इव आचरति गोपाल: कृष्णायते - कृष्ण + क्यङ् / कृष्ण + य / अकृत्सार्वधातुकयोर्दीर्घ: इति दीर्घे - कृष्णाय = कृष्णायते।

पुष्करम् इव आचरति कुमुदम् पुष्करायते - पुष्कर + क्यङ् / पुष्कर + य / अकृत्सार्वधातुकयोर्दीर्घः इति दीर्घे - पुष्कराय = पुष्करायते।

अवगल्भ इव आचरति देवदत्तः अवगल्भायते - अवगल्भ + क्यङ् / अवगल्भ + य / अकृत्सार्वधातुकयोर्दीर्घः इति दीर्घे - अवगल्भाय = अवगल्भायते।

होड इव आचरति देवदत्तः होडायते - होड + क्यङ् / होड + य / अकृत्सार्वधातुकयोर्दीर्घः इति दीर्घे - होडाय = होडायते।

क्लीब इव आचरति देवदत्तः क्लीबायते + क्यङ् / क्लीब + य / अकृत्सार्वधातुकयोर्दीर्घः इति दीर्घे - क्लीबाय = क्लीबायते।

अश्व इवाचरति गर्दभः अश्वायते - अश्व + क्यङ् / अश्व + य / अकृत्सार्वधातुकयोर्दीर्घः इति दीर्घे - अश्वाय = अश्वायते। एवमेव - काकायते। गर्दभायते।

इकारस्य दीर्घः - हरिः इव आचरति पौण्ड्रकः - हरि + क्यङ् / हरि + य / अकृत्सार्वधातुकयोर्दीर्घः इति दीर्घे - हरीय = हरीयते। एवमेव - कपीयते। कवीयते।

उकारस्य दीर्घः - गुरुः इव आचरति शिष्यः - गुरु + क्यङ् / गुरु + य / अकृत्सार्वधातुकयोर्दीर्घः इति दीर्घे - गुरूय = गुरूयते।

उकारस्य दीर्घः - विष्णुः इव आचरति कश्चिद् - विष्णु + क्यङ् / विष्णु + य / अकृत्सार्वधातुकयोर्दीर्घः इति दीर्घे - विष्णूय = विष्णूयते।

२. ऋकारस्य स्थाने रीङ्=री भवति

रीङ् ऋतः - ऋकारान्ताङ्गस्य रीङ् भवति कृद्भिन्ने, सार्वधातुकभिन्ने यकारे, च्वौ च परतः।

कर्ता इव आचरति - कर्तृ + क्यच् / कर्तृ + य / ऋकारस्य रीङ् (री) आदेशे - कर्त् + री + य - कर्त्री + य - कर्त्रीय = कर्त्रीयते।

स्वयं माता न होकर भी माता जैसा आचरण करती है।

मातृ + क्यच् / मातृ + य / ऋकारस्य रीङ् (री) आदेशे - मात् + री + य - मात्री + य - मात्रीय = मात्रीयते।

स्वयं माता न होकर भी माता जैसा आचरण करती है।

भ्रातृ + क्यच् / भ्रातृ + य / ऋकारस्य रीङ् (री) आदेशे - भ्रात् + री + य - भ्रात्री + य - भ्रात्रीय = भ्रात्रीयते।

स्वयं भ्राता न होकर भी भ्राता जैसा आचरण करता है।

३. प्रातिपदिकान्तस्य नकारस्य लोपो भवति

नलोपः प्रातिपदिकान्तस्य - प्रातिपदिकसंज्ञकं यत्पदं, तदन्तस्य लोपो भवति।

राजन् + क्यङ् / राज + य / अकृत्सार्वधातुकयोर्दीर्घः इति दीर्घे - राजाय = राजायते। स्वयं राजा न होकर भी राजा जैसा आचरण करता है।

करिन् + क्यङ् / करि + य / अकृत्सार्वधातुकयोर्दीर्घः इति दीर्घे - करीय = करीयते। स्वयं हाथी न होकर भी हाथी जैसा आचरण करता है।

४. सकारान्तप्रातिपदिकेभ्यः क्यङ् प्रत्यये ---

ओजसोऽप्सरसो नित्यमितरेषां विभाषया - क्यङ् प्रत्यये परतः, ओजस्, अप्सरस्, अनयोः सकारस्य नित्यं लोपो भवति।

अप्सरस् + क्यङ् / सलोपे - अप्सर + य / अकृत्सार्वधातुकयोर्दीर्घः इति दीर्घे - अप्सराय / अप्सरायते। स्वयं अप्सरा न होकर भी अप्सरा जैसा आचरण करती है।

ओजस् + क्यङ् / सलोपे - ओज + य / अकृत्सार्वधातुकयोर्दीर्घः इति दीर्घे - ओजाय = ओजायते।

अन्येषां सकारान्तानां सकारस्य वा लोपो भवति।

पयस् + क्यङ्	-	पयाय	-	पयायते	पयस्यते
यशस् + क्यङ्	-	यशाय	-	यशायते	यशस्यते
विद्वस् + क्यङ्	-	विद्वाय	-	विद्वायते	विद्वस्यते

५. युष्मद्-अस्मद् प्रातिपदिकाभ्यां क्यङ् प्रत्यये

प्रत्ययोत्तरपदयोश्च - एकवचने वर्तमानस्य युष्मद्-शब्दस्य त्वद् आदेशो भवति एकवचने वर्तमानस्य अस्मद्-शब्दस्य मद् आदेशो भवति।

त्वं इव आचरति त्वद्यते / अहम् इव आचरति मद्यते।

बहुवचने न भवति - यूयम् इव आचरति - युष्मद्यते / वयम् इव आचरति अस्मद्यते।

६. स्त्रीप्रत्ययान्तेभ्यः क्यङ् प्रत्यये

क्यङ्मानिनोश्च - इत्यनेन भाषितपुंस्कानां पुंवद्भावो भवति, क्यङ्प्रत्यये।

हंसी इव आचरति - हंसी + क्यङ् / पुंवद्भावे - हंस + य / अकृत्सार्वधातुकयोर्दीर्घ इति दीर्घे - हंसाय - हंसायते।

सपत्नी इवाचरति - सपत्नी + क्यङ् / पुंवद्भावे - सपत्न + य / अकृत्सार्वधातुकयोर्दीर्घ इति दीर्घे - सपत्नाय - सपत्नायते।

सपत्नी इवाचरति - सपत्नी + क्यङ् / पुंवद्भावे - सपति + य /

अकृत्सार्वधातुकयोर्दीर्घ इति दीर्घे - सपतीय - सपतीयते।

कुमारी इव आचरति - कुमारी + क्यङ् / पुंवद्भावे - कुमार + य / अकृत्सार्वधातुकयोर्दीर्घ इति दीर्घे - कुमाराय - कुमारायते ।

हरिणी इव आचरति - हरिणी + क्यङ् / पुंवद्भावे - हरित + य / अकृत्सार्वधातुकयोर्दीर्घ इति दीर्घे - हरिताय - हरितायते।

हरिणी इव आचरति - हरिणी + क्यङ् / पुंवद्भावे - हरिण + य / अकृत्सार्वधातुकयोर्दीर्घ इति दीर्घे - हरिणाय -हरिणायते।

गुर्वी इव आचरति - गुर्वी + क्यङ् / पुंवद्भावे - गुरु + य / अकृत्सार्वधातुकयोर्दीर्घ इति दीर्घे - गुरूय - गुरूयते।

युवती इव आचरति युवायते - युवती + क्यङ् / पुंवद्भावे - युवन् + य / नलोपः प्रातिपदिकान्तस्य इति नलोपे - युव + य / अकृत्सार्वधातुकयोर्दीर्घ इति दीर्घे - युवाय - युवायते।

पट्वीमृद्व्यौ इव आचरति पट्वीमृदूयते। पट्वीमृद्वी इत्यस्याः पुंवद्भावे - पट्वीमृदु + य / अकृत्सार्वधातुकयोर्दीर्घ इति दीर्घे - पट्वीमृदूय - पट्वीमृदूयते।

पुंवद्भावस्यापवादाः -

न कोपधायाः - येषां स्त्रीप्रत्ययान्तानामुपधायां वर्तते ककारः, यथा - पाचिका, पाठिका, कारिका, गायिका, मद्रिका, तेषां पुंवद्भावो न भवति। पाचिका इवाचरति पाचिकायते। एवमेव - पाठिकायते, कारिकायते, गायिकायते, मद्रिकायते।

इति आचारे क्यङ् निष्पन्नः

भृशादिभ्यो 'भवति' इत्यस्मिन्नर्थे 'क्यङ्' भवति

भृशादिभ्यो भुव्यच्वेर्लोपश्च हलः (३.१.१२) - 'भृशादिगणपठितेभ्यः प्रातिपदिकेभ्यः अच्व्यन्तेभ्यो 'भवति' इत्यस्मिन्नर्थे क्यङ् भवति। हलश्च लोपो भवति। यथा - अभृशो भृशो भवति भृशायते = जो भृश नहीं है, वह भृश हो जाता है।

योऽर्थो भवति च्विप्रत्ययस्य, स एवार्थोऽनेनाभिधीयते, च्विप्रत्ययं विनापि।

भृश - अभृशो भृशो भवति भृशायते

शीघ्र - अशीघ्रो शीघ्रो भवति शीघ्रायते।

मन्द - अमन्दो मन्दो भवति मन्दायते।

पण्डित - अपण्डितः पण्डितो भवति पण्डितायते।

उत्सुक - अनुत्सुकः उत्सुको भवति उत्सुकायते।

अधर - अनधरः अधरो भवति अधरायते ।

शुधि - अशुधिः शुधिः भवति शुधीयते

अनुन्मनाः उन्मना भवति उन्मनायते - उन्मनस् + क्यङ् / उन्मनस् + य / सकारलोपे - उन्मन + य / अकृत्सार्वधातुकयोर्दीर्घः इति दीर्घे - उन्मनाय - उन्मनायते ।

अभिमनस् - अनभिमनाः अभिमना भवति अभिमनायते ।

सुमनस् - दुर्मनाः सुमनाः भवति सुमनायते ।

दुर्मनस् - सुमनाः दुर्मनाः भवति दुर्मनायते आदि बनाइये ।

एवमेव - रहस् + क्यङ् - रहायते / रेहस् + क्यङ् - रेहायते / शश्वत् + क्यङ् - शश्वायते / वेहत् + क्यङ् - वेहायते / नृषत् + क्यङ् - नृषायते / ओजस् + क्यङ् - ओजायते / वर्चस् + क्यङ् - वर्चायते / बृहत् + क्यङ् - बृहायते इत्यादयः ।

लोहितडाज्भ्यः क्यष्वचनं, भृशादिष्वितराणि - 'लोहितादिडाज्भ्यः क्यष् ३.१.१६.' इत्यस्मिन् सूत्रे पठितेभ्योऽपि भवत्यर्थे क्यङेव भवति, लोहितं डाजन्तं च वर्जयित्वा ।

अश्यामः श्यामो भवति	श्याम	+	क्यङ्	-	श्यामायते
असुखवान् सुखवान् भवति	सुख	+	क्यङ्	-	सुखायते
अदुःखवान् दुःखवान् भवति	दुःख	+	क्यङ्	-	दुःखायते
अगर्वः गर्ववान् भवति	गर्व	+	क्यङ्	-	गर्वायते
अहर्षो हर्षवान् भवति	हर्ष	+	क्यङ्	-	हर्षायते
अनिद्रो निद्रावान् भवति	निद्रा	+	क्यङ्	-	निद्रायते
अकरुणो करुणावान् भवति	करुणा	+	क्यङ्	-	करुणायते
अकृपः कृपावान् भवति	कृपा	+	क्यङ्	-	कृपायते

एवमेव - नील - नीलायते / पीत - पीतायते / हरित - हरितायते / मद्र - मद्रायते / फेन - फेनायते / मन्द - मन्दायते ।

आकृत्या गण्यते, इत्याकृतिगणोऽयम् । अतोऽन्येभ्योऽपि भवति । मूर्च्छा - मूर्च्छायते / धूमा - धूमायते / नित्य - नित्यायते / चर्मन् - चर्मायते/ इत्यादयः ।

कष्टाय क्रमणे - चतुर्थ्यन्तात् कष्टात् क्रमणेऽर्थे क्यङ् प्रत्ययो भवति ।

कष्टाय क्रमते - कष्ट + क्यङ् = कष्टाय - कष्टायते - पापं कर्तुम् उत्सहते ।

सत्रकक्षकृच्छ्रगहनेभ्यः कण्वचिकीर्षायाम् इति वक्तव्यम् - (वार्तिक) - सत्र, कक्ष, कृच्छ्र, गहन एभ्यः क्यङ् प्रत्ययो भवति, पापचिकीर्षायाम् । सत्रायते / कक्षायते / कृच्छ्रायते / गहनायते ।

कर्मणो रोमन्थतपोभ्यां वर्तिचरोः - रोमन्थशब्दात् 'वर्तयति' इत्यस्मिन्नर्थे, तपःशब्दाच्च 'चरति' इत्यस्मिन्नर्थे क्यङ् प्रत्ययो भवति ।

तापसः तपश्चरति - तपस्यति, अत्र परस्मैपदम्।

रोमन्थायते गौः, अत्रात्मनेपदम्।।

हनुचलने इति वक्तव्यम् - अतः कीटो रोमन्थं वर्तयति इत्यत्र न भवति।

वाष्पोष्मभ्यामुद्वमने - वाष्पशब्दात्, ऊष्मन्शब्दाच्च कर्मणः उद्वमनेर्थे क्यङ् प्रत्ययो भवति। वाष्पम् उद्वमति - वाष्पायते / ऊष्माणं उद्वमति - ऊष्मायते।

फेनाच्चेति वक्तव्यम् - फेनम् उद्वमति - फेनायते।

शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे - शब्दं करोति - शब्दायते / वैरं करोति - वैरायते / कलहं करोति - कलहायते। अभ्रायते, कण्वायते, मेघायते।

सुदिनदुर्दिननीहारेभ्यश्च वक्तव्यम् - **(वार्तिक)** - सुदिनं करोति सुदिनायते / दुर्दिनं करोति दुर्दिनायते / नीहारं करोति नीहारायते।

अटाट्टाशीकाकोटापोटासोटाकष्टासृष्टाधृष्टापृष्टाग्रहणं कर्तव्यम् (वार्तिक) - अटायते / अट्टायते / शीकायते / कोटायते / पोटायते / सोटायते / सृष्टायते / धृष्टायते / पृष्टायते।

सुखादिभ्यः कर्तृवेदनायाम् - सुख। दुःख। तृप्त। गहन। कृच्छ्र। अस्त्र। अलीक। प्रतीप। करुण। कृषण। सोढ। एभ्यः 'अनुभवति' इत्येतस्मिन्नर्थे क्यङ् प्रत्ययो भवति। सुखं वेदयते (अनुभवति) सुखायते। एवमेव - दुःखायते, तृप्तायते इत्यादयः।

इति अन्येष्वर्थेषु क्यङ् निष्पन्नः

क्यष् प्रत्ययः - कर्मवाचकात् सुबन्तात्

वा क्यषः - क्यष्-प्रत्ययान्तेभ्यो धातुभ्य उभयपदिनः प्रत्यया भवन्ति।

लोहितादिडाज्भ्यः क्यष् - लोहितप्रातिपदिकात्, डाजन्तेभ्यश्च 'भवति' इत्येतस्मिन्नर्थे क्यष् प्रत्ययो भवति।

लोहित	+	क्यष्	-	लोहितायति / लोहितायते।
लोहिनी	+	क्यष्	-	लोहिनीयति / लोहिनीयते।

अव्यक्तानुकरणाद्द्व्यजवरार्धादनितौ डाच् -

कृञो द्वितीयतृतीयशम्बबीजात्कृषौ -

खटखटा, पटपटा, खरटखरटा इत्यादिभ्यः अव्यक्तानुकरणेभ्यो डाच् भवति। एभ्यो डाजन्तेभ्यः क्यष् प्रत्ययो भवति।

पटपटा	+	क्यष्	-	पटपटायति	-	पटपटायते
खटखटा	+	क्यष्	-	खटखटायति	-	खटखटायते

त्रपटत्रपटा	+	क्यष्	-	त्रपटत्रपटायति	-	त्रपटत्रपटायते
खरटखरटा	+	क्यष्	-	खरटखरटायति	-	खरटखरटायते
दमदमा	+	क्यष्	-	दमदमायति	-	दमदमायते
मटमटा	+	क्यष्	-	मटमटायति	-	मटमटायते

इति भवत्यर्थे क्यष् निष्पन्नः

क्विप् प्रत्ययः - सर्वेभ्यः प्रातिपदिकेभ्यः

सर्वप्रातिपदिकेभ्यो क्विब्वा वक्तव्यः - सर्वेभ्यः प्रातिपदिकेभ्यः 'आचरति' इत्यस्मिन्नर्थे क्विप् प्रत्ययो वा भवति।

अश्व इवाचरति अश्वति। काकति। गर्दभति।

क्विप्-प्रत्ययस्य सर्वापहारी लोपो भवति। किमपि नावशिष्यते।

शेषात्कर्तरि परस्मैपदम् - क्विप्प्रत्ययान्तेभ्यो धातुभ्यः शेषत्वात् परस्मैपदिनः प्रत्यया भवन्ति।

आचारेऽवगल्भक्लीबहोडेभ्यः क्विब्वा वक्तव्यः - अवगल्भ, क्लीब, होड एतेभ्यः 'आचरति' इत्यस्मिन्नर्थे क्विप् प्रत्ययो वा भवति। वाग्रहणात् क्यङपि।

क्विबन्तेभ्य आत्मनेपदं भवति।

क्विपि	-	अवगल्भते	क्यङि	-	अवगल्भायते।
क्विपि	-	क्लीबते	क्यङि	-	क्लीबायते।
क्विपि	-	होडते	क्यङि	-	होडायते।

अकारान्तेभ्यः प्रातिपदिकेभ्यः क्विप् प्रत्ययः - गर्दभः इव आचरति गर्दभति / गर्दभ + क्विप् / क्विपो लोपे - गर्दभ = गर्दभति। एवमेव सर्वेभ्योऽकारान्तेभ्यः।

अश्व	+	क्विप्	-	क्विप्प्रत्ययस्य लोपे	-	अश्व	-	अश्वति
गर्दभ	+	क्विप्	-	क्विप्प्रत्ययस्य लोपे	-	गर्दभ	-	गर्दभति
राम	+	क्विप्	-	क्विप्प्रत्ययस्य लोपे	-	राम	-	रामति
काक	+	क्विप्	-	क्विप्प्रत्ययस्य लोपे	-	काक	-	काकति

आकारान्तेभ्यः प्रातिपदिकेभ्यः क्विप् प्रत्ययः -

माला इव आचरति मालाति। माला + क्विप् / क्विपो लोपे माला = मालाति। एवमेव - शाला = शालाति / चटका = चटकाति / खट्वा = खट्वाति इत्यादयः।

इकारान्तेभ्यः, ईकारान्तेभ्यः प्रातिपदिकेभ्यः क्विप् प्रत्ययः -

कविः इव आचरति कवयति। कवि + क्विप् / सर्वापहारिलोपे - क्विप् + शप् + तिप् / सार्वधातुकार्धधातुकयोः इति इकारस्य गुणे - कवय् + अ + ति = कवयति। हरिरिव आचरति हरयति। एवमेव सर्वे इकारान्ताः।

कवि	-	कवय	-	कवयति
हरि	-	हरय	-	हरयति
कपि	-	कपय	-	कपयति
मुनि	-	मुनय	-	मुनयति
श्री	-	श्रय	-	श्रयति
लक्ष्मी	-	लक्ष्मय	-	लक्ष्मयति
धी	-	धय	-	धयति

उकारान्तेभ्यः प्रातिपदिकेभ्यः क्विप् प्रत्ययः -

भानुः इव आचरति भानवति। कृशानुरिव आचरति कृशानवति। एवमेव सर्वे उकारान्ताः।

गुरु	-	गुरव	-	गुरवति
धेनु	-	धेनव	-	धेनवति
वधू	-	वधव	-	वधवति
श्वश्रू	-	श्वश्रव	-	श्वश्रवति

ऋकारान्तेभ्यः प्रातिपदिकेभ्यः क्विप् प्रत्ययः -

माता इव आचरति मातरति। पिता इव आचरति पितरति। एवमेव सर्वे ऋकारान्ताः।

मातृ	-	मातर्	-	मातरति
पितृ	-	पितर्	-	पितरति
कर्तृ	-	कर्तर्	-	कर्तरति

ए, ऐ, ओ औ एषां स्थाने क्रमशः अय् अव् आय् आव्, एत आदेशा भवन्ति।

राः इव आचरति रायति। नौः इव आचरति नावति।

से	-	सय	-	सयति
गो	-	गव	-	गवति
रै	-	राय	-	रायति
नौ	-	नाव	-	नावति

अनुनासिकान्तेभ्यः प्रातिपदिकेभ्यः क्विप् प्रत्ययः -

एषामुपधाया दीर्घो भवति 'अनुनासिकस्य क्विझलोः क्ङिति' इत्यनेन -

इदम्	=	इदामति	राजन्	=	राजानति
मथिन्	=	मथीनति	ऋभुक्षिन्	=	ऋभुक्षीणति
करिन्	=	करीणति	पथिन्	=	पथीनति

वकारान्तेभ्यः प्रातिपदिकेभ्यः क्विप् प्रत्ययः -

वकारस्य ऊठ् भवति 'च्छ्वोः शूडनुनासिके च' इत्यनेन -

दिव् + क्विप् - दि + ऊ - द्यू - द्यव = द्यवति।

उपधायाः लघोरिकः स्थाने गुणो भवति - क्षुध् + क्विप् - क्षोधति / तृष् + क्विप् - तर्षीति /

अन्येषां किमपि न भवति - सरित् + क्विप् = सरितति इत्यादयः।

अत्र चिन्त्यम् - केषांचित् मतेन हलन्तेभ्यः प्रातिपदिकेभ्य आचारक्विप् न भवति।

णिङ् प्रत्ययः

पुच्छभाण्डचीवराण्णिङ् - पुच्छ, भाण्ड, चीवर, इत्येतेभ्यो णिङ् प्रत्ययो भवति करणविशेषे।

पुच्छादुदसने पर्यसने वा - उत्पुच्छयते = पूँछ उठाता है।

भाण्डात्समाचयने - संभाण्डयते = बर्तन संग्रह करता है।

चीवरादर्जने परिधाने वा - संचीवरयते भिक्षुः = भिक्षु कपड़े पाता है / पहिनता है।

णिच् प्रत्ययः - सर्वेभ्यः प्रातिपदिकेभ्यः

प्रातिदिकाद् धात्वर्थे बहुलमिष्ठवच्च - प्रातिपदिकेभ्योऽनेकेष्वर्थेषु भवत्ययं णिच् प्रत्ययः। अयं णिच्प्रत्यय इष्ठन्प्रत्ययवत् भवति। अतोऽस्मिन् परतः तत्सर्वं भवति, यद् भवति इष्ठन्प्रत्यये परतः।

किं भवतीष्ठन्प्रत्यये परत इत्युच्यते -----

अनेकाच्प्रातिपदिकेभ्यो णिच्

टेः - अनेकाच्-प्रातिपदिकानां टेर्लोपो भवति।

नस्तद्धिते - नान्तस्य भस्य टेर्लोपो भवति, तद्धिते। नान्तानां टेर्लोपोऽनेन विधेयः।

प्रकृत्यैकाच् - एकाच्-प्रातिपदिकानां टेर्लोपो न भवति। इदं व्याख्यायते ---

प्रातिपदिकं द्विविधम् - एकाच्। अनेकाच्, इति।

तत्र स्व, श्वन्, गो, नौ, रै, इत्यादीनि एकाच्प्रातिपदिकानि।

रवि, विधि, विधु, भानु, वधू, मातृ, पितृ, विद्वस्, सरित्, हस्तिन्, इत्यादीनि अनेकाच्प्रातिपदिकानि।

एषामनेकाच्-प्रातिपदिकानां टेर्लोपो भवति अस्मिन् णिचि परतः, 'टेः' इत्यनेन सूत्रेण।

अचां मध्ये योऽन्त्योऽच्, तदादि शब्दरूपं टिसंज्ञं स्यात्। यथा - राम इत्यत्र 'अ', हरि इत्यत्र 'इ', भानु इत्यत्र 'उ', मातृ इत्यत्र 'ऋ', राजन् इत्यत्र 'अन्', सरित् इत्यत्र 'इत्', विद्वस् इत्यत्र 'अस्', एते टिसंज्ञकाः। अनेकाच्-प्रातिपदिकानां टेर्लोपो भवति णिचि।

यथा - अश्व + णिच् / अश्व + इ - अश्वि / अश्वि + शप् + ति / अश्वे + अ + ति / अश्वय् + अ + ति = अश्वयति। एवमेव प्रक्रिया णिचि सर्वत्र।

अश्व	+	णिच्	-	अनेकाच्त्वात् टिलोपे	-	अश्व्	-	अश्वयति
काक	+	णिच्	-	अनेकाच्त्वात् टिलोपे	-	काक्	-	काकयति
त्वच	+	णिच्	-	अनेकाच्त्वात् टिलोपे	-	त्वच्	-	त्वचयति
हरि	+	णिच्	-	अनेकाच्त्वात् टिलोपे	-	हर्	-	हरयति
रवि	+	णिच्	-	अनेकाच्त्वात् टिलोपे	-	रव्	-	रवयति
कवि	+	णिच्	-	अनेकाच्त्वात् टिलोपे	-	कव्	-	कवयति
नदी	+	णिच्	-	अनेकाच्त्वात् टिलोपे	-	नद्	-	नदयति
विधु	+	णिच्	-	अनेकाच्त्वात् टिलोपे	-	विध्	-	विधयति
भानु	+	णिच्	-	अनेकाच्त्वात् टिलोपे	-	भान्	-	भानयति
लघु	+	णिच्	-	अनेकाच्त्वात् टिलोपे	-	लघ्	-	लघयति
वसु	+	णिच्	-	अनेकाच्त्वात् टिलोपे	-	वस्	-	वसयति
वधू	+	णिच्	-	अनेकाच्त्वात् टिलोपे	-	वध्	-	वधयति
मातृ	+	णिच्	-	अनेकाच्त्वात् टिलोपे	-	मात्	-	मातयति
भ्रातृ	+	णिच्	-	अनेकाच्त्वात् टिलोपे	-	भ्रात्	-	भ्रातयति

स्वसृ	+	णिच्	-	अनेकाच्त्वात् टिलोपे	-	स्वस्	-	स्वसयति
महत्	+	णिच्	-	अनेकाच्त्वात् टिलोपे	-	मह्	-	महयति
करिन्	+	णिच्	-	अनेकाच्त्वात् टिलोपे	-	कर्	-	करयति
सरित्	+	णिच्	-	अनेकाच्त्वात् टिलोपे	-	सर्	-	सरयति
हस्तिन्	+	णिच्	-	अनेकाच्त्वात् टिलोपे	-	हस्त्	-	हस्तयति
वचस्	+	णिच्	-	अनेकाच्त्वात् टिलोपे	-	वच्	-	वचयति

युवाम् युष्मान् वा आचष्टे –

युष्मद्	+	णिच्	-	अनेकाच्त्वात् टिलोपे	-	युष्म्	-	युष्मयति

आवाम् अस्मान् वा आचष्टे –

अस्मद्	+	णिच्	-	अनेकाच्त्वात् टिलोपे	-	अस्म्	-	अस्मयति

विद्वांसम् आचष्टे –

विद्वस्	+	णिच्	-	अनेकाच्त्वात् टिलोपे	-	विद्व्	-	विद्वयति विदावयति विदयति

णिचश्च (१.३.७४) – णिजन्तेभ्यो धातुभ्यः कर्त्रभिप्राये क्रियाफले आत्मनेपदं भवति। कुमारयति / कुमारयते।

णिच्प्रत्यये परत इदमपि विचार्यम्

१. **पुंवद्भाव** – यदि वर्तति शब्दः कश्चन स्त्रीप्रत्ययान्तः, तादृशानां भाषितपुंस्कानां स्त्रीलिङ्गशब्दानां 'भस्याढे तद्धिते पुंवद्भावः' इत्यनेन सूत्रेण आदौ पुंवद्भावो विधेयः।

२. **विन्–मतुप्–प्रत्यययोर्लुग्** – यदि प्रातिपदिकस्यान्ते वर्तति विन् प्रत्ययो, मतुप् प्रत्ययो वा, तदा 'विन्मतोर्लुक्' इत्यनेन सूत्रेणानयोर्लुग् विधेयः।

३. अनन्तरमवशिष्टस्यानेकाच्प्रातिपदिकस्य टिलोपो विधेय इति। यथा –

पयस्विनीं करोति – पयस्विनी + णिच् – पयस्विन् – पयस् – टिलोपे – पयसयति
बुद्धिमतीम् आचष्टे – बुद्धिमती + णिच् – बुद्धिमत् – बुद्धि – टिलोपे – बुद्धयति

यत्र विन्मतुप्प्रत्ययौ न स्तः, तत्र पुवद्भावं कृत्वा टिलोपो विधेयः।

कुमारीम् आचष्टे – कुमारी + णिच् – कुमार – टिलोपे – कुमारयति
हंसीम् आचष्टे – हंसी + णिच् – हंस – टिलोपे – हंसयति

एनीम् आचष्टे - एनी + णिच् - एत - टिलोपे - एतयति

एकाच्प्रातिपदिकेभ्यो णिच्

एकाच्त्वेऽपि अव्ययसंज्ञकानां प्रातिपदिकानां टेर्लोपो भवति 'अव्ययानां भमात्रे टिलोपः' इत्यनेन।

स्वः आचष्टे - स्वर् + णिच् - टिलोपे - स्व् + इ - स्वि - स्वयति।

श्वन्शब्दस्य सम्प्रसारणं भवति। श्वानम् आचष्टे शावयति। शुनयति।

अकारान्ताः आकारान्ताः - स्व + णिच् ---

स्वम् आचष्टे - स्व + णिच् - अचो ञ्णिति इति वृद्धौ - स्वा + इ - अर्तिह्रीव्लीरीक्नूयीक्ष्माय्यातां पुङ्णौ - इत्याकारान्तस्य पुगागमे - स्वाप् + इ - स्वापि - स्वापयति।

इकारान्ता, ईकारान्ताः -

वि + णिच् - अचो ञ्णिति इति वृद्धौ - वै + इ - एचोऽयवायावः इत्यायादेशे - वायि - वाययति। एवमेव - धी - धै - धायि - धाययति।

उकारान्ता, ऊकारान्ताः -

भू + णिच् अचो ञ्णिति इति वृद्धौ - भौ + इ - एचोऽयवायावः इत्यावादेशे - भावि - भावयति।

ऋकारान्ता, ॠकारान्ताः - नृ + णिच् - अचो ञ्णिति इति वृद्धौ - नार् + इ - नारि - नारयति।

ऐकारान्ताः - रै + णिच् - एचोऽयवायावः इत्यायादेशे - रायि - राययति।

ओकारान्ताः - गो + णिच् - अचो ञ्णिति इति वृद्धौ - गौ + इ - एचोऽयवायावः इत्यवादेशे - गावि - गावयति।

अत्र विशेषः - गोमत् + णिच् इत्यत्र विन्मतोर्लुक् इति मतुपो लुकि 'संज्ञापूर्वको विधिरनित्यः' इति वृद्धिर्न भवति, अतः - गवयति।

औकारान्ताः - नौ + णिच् - एचोऽयवायावः इत्यावादेशे - नावि - नावयति।

हलन्ताः - त्वद् + णिच् - अत उपधायाः इत्युपधावृद्धौ - त्वाद् + इ - त्वादि - त्वादयति।

मद् + णिच् - अत उपधायाः इत्युपधावृद्धौ - माद् + इ - मादि - मादयति।

अन्येषां धातूनामुपधायाः न किमपि - क्षुध् + णिच् - क्षुधयति। तृष् - तृषयति। इत्यादयः।

णिचि परतः प्रातिपदिकानां स्थाने आदेशाः

इदानीं तेषां शब्दानां णिचि रूपाणि, येषां स्थाने आदेशा भवन्ति णिचि परतः।

वृद्ध	+	णिच्	-	ज्य	-	ज्यापि	-	ज्यापयति
वृद्ध	+	णिच्	-	वर्ष्	-	वर्षि	-	वर्षयति
अन्तिक	+	णिच्	-	नेद्	-	नेदि	-	नेदयति
बाढ	+	णिच्	-	साध्	-	साधि	-	साधयति
युवन्	+	णिच्	-	कन्	-	कनि	-	कनयति
अल्प	+	णिच्	-	कन्	-	कनि	-	कनयति
स्थूल	+	णिच्	-	स्थो	-	स्थवि	-	स्थवयति
दूर	+	णिच्	-	दो	-	दवि	-	दवयति
युवन्	+	णिच्	-	यो	-	यवि	-	यवयति
ह्रस्व	+	णिच्	-	ह्रस्	-	ह्रसि	-	ह्रसयति
क्षिप्र	+	णिच्	-	क्षेप्	-	क्षेपि	-	क्षेपयति
क्षुद्र	+	णिच्	-	क्षोद्	-	क्षोदि	-	क्षोदयति
प्रिय	+	णिच्	-	प्र	-	प्रापि	-	प्रापयति
स्थिर	+	णिच्	-	स्थ	-	स्थापि	-	स्थापयति
स्फिर	+	णिच्	-	स्फ	-	स्फापि	-	स्फापयति
उरु	+	णिच्	-	वर्	-	वरि	-	वरयति
बहुल	+	णिच्	-	बंह्	-	बंहि	-	बंहयति
गुरु	+	णिच्	-	गर्	-	गरि	-	गरयति
तृप्र	+	णिच्	-	त्रप्	-	त्रपि	-	त्रपयति
दीर्घ	+	णिच्	-	द्राघ्	-	द्राघि	-	द्राघयति
वृन्दारक	+	णिच्	-	वृन्द्	-	वृन्दि	-	वृन्दयति
बहु	+	णिच्	-	भू	-	भावि	-	भावयति / बहयति
पृथु	+	णिच्	-	प्रथ्	-	प्रथि	-	प्रथयति
मृदु	+	णिच्	-	म्रद्	-	म्रदि	-	म्रदयति
भृश	+	णिच्	-	भ्रश्	-	भ्रशि	-	भ्रशयति

परि + वृढ + णिच् - परिव्रढ् - परिव्रढि - परिव्रढयति

विष्वद्र्यङ्	+	णिच्	-	विष्वद्राययति
देवद्र्यङ्	+	णिच्	-	देवद्राययति
तद्र्यङ्	+	णिच्	-	तद्राययति
यद्र्यङ्	+	णिच्	-	यद्राययति
सम्यङ्	+	णिच्	-	समीचयति
प्रत्यङ्	+	णिच्	-	प्रतीचयति
उदङ्	+	णिच्	-	उदीचयति
सध्र्यङ्	+	णिच्	-	सध्राययति
तिर्यङ्	+	णिच्	-	तिराययति

इदानीं णिच्-प्रत्ययस्यार्थविचारः क्रियते ---

प्रातिपदिकाद् धात्वर्थे बहुलमिष्ठवच्च - दर्शनं, वचनं, श्रवणम्, आख्यानं, करणमित्यादयो धात्वर्थाः। एष्वर्थेषु प्रातिपदिकेभ्यो 'णिच्' प्रत्ययो भवति।

तत्करोति तदाचष्टे -

युद्धम् आचष्टे	-	युद्ध	+	णिच्	=	युद्धयति
कविम् आचष्टे	-	कवि	+	णिच्	=	कवयति

तेनातिक्रामति -

अश्वेन अतिक्रामति	-	अश्व	+	णिच्	=	अश्वयति
हस्तिना अतिक्रामति	-	हस्तिन्	+	णिच्	=	हस्तयति

कर्तृकरणाद् धात्वर्थे -

असिना हन्ति	-	असि	+	णिच्	=	असयति

शब्दवैरकलहाभ्रकण्वमेघेभ्यः करणे -

शब्दं करोति	-	शब्द	+	णिच्	=	शब्दयति
वैरं करोति	-	वैर	+	णिच्	=	वैरयति
कलहं करोति	-	कलह	-	णिच्	=	कलहयति

मुण्डमिश्रश्लक्ष्णलवणव्रतवस्त्रहलकलकृततूस्तेभ्यो णिच् - मुण्ड, मिश्र, श्लक्ष्ण, लवण, व्रत, वस्त्र, हल, कल, कृत, तूस्त, एभ्यः प्रातिपदिकेभ्यः करोत्यर्थे णिच् प्रत्ययो भवति।

मुण्डं करोति	-	मुण्ड	+	णिच्	=	मुण्डयति।
मिश्रं करोति	-	मिश्र	+	णिच्	=	मिश्रयति

वस्त्रं श्लक्ष्णयति = निर्मलं करोति। लवणयति = लवणयुक्तं करोति।

व्रताद् भोजने तन्निवृत्तौ च – व्रतशब्दाद् भोजने, तन्निवृत्तौ च णिच् भवति। पयो व्रतयति, वृषलान्नं व्रतयति।

वस्त्रात्समाच्छादने – वस्त्रशब्दात् समाच्छादनेऽर्थे णिच् भवति। संवस्त्रयति।

हल्यादिभ्यो ग्रहणे –

हलिं गृह्णाति	-	हलि	+	णिच्	=	हलयति
कलिं गृह्णाति	-	कलि	+	णिच्	=	कलयति

तूस्तानि विहन्ति - तूस्त + णिच् - केशान् वितूस्तयति (विशदीकरोति)।

सत्यापपाशरूपवीणातूलश्लोकसेनालोमत्वचवर्मवर्णचूर्णचुरादिभ्यो णिच्–

सत्याप, पाश, रूप, वीणा, तूल, श्लोक, सेना, लोम, त्वच्, वर्मन्, वर्ण, चूर्ण, एभ्यः स्वार्थे णिच् भवति।

पाशाद् विमोचयति	-	विपाश	+	णिच्	-	विपाशयति
रूपं दर्शयति	-	रूप	+	णिच्	-	रूपयति
वीणया उपगायति	-	उपवीणा	+	णिच्	-	उपवीणयति
तूलेन अनुकुष्णाति	-	अनुतूल	+	णिच्	-	अनुतूलयति
श्लोकैः उपस्तौति	-	उपश्लोक	+	णिच्	-	उपश्लोकयति
सेनया अभियाति	-	अभिषेण	+	णिच्	-	अभिषेणयति
लोमानि अनुमार्ष्टि	-	अनुलोम	+	णिच्	-	अनुलोमयति
वर्मणा संनह्यति	-	संवर्मन्	+	णिच्	-	संवर्मयति
चूर्णैः अवध्वंसयति	-	अवचूर्ण	+	णिच्	-	अवचूर्णयति
वर्णं गृह्णाति	-	वर्ण	+	णिच्	-	वर्णयति
त्वचं गृह्णाति	-	त्वच	+	णिच्	-	त्वचयति

अर्थवेदयोरापुग्वक्तव्यः –

सत्यम् आचष्टे	-	सत्य	+	आपुक्	-	सत्यापयति
अर्थम् आचष्टे	-	अर्थ	+	आपुक्	-	अर्थापयति
वेदम् आचष्टे	-	वेद	+	आपुक्	-	वेदापयति

तत्करोति इत्युपसंख्यानम् सूत्रयत्याद्यर्थम् –

सूत्रं करोति - सूत्रयति।

आख्यानात्कृतस्तदाचष्टे कृल्लुक् प्रकृतिप्रत्ययापत्तिः प्रकृतिवच्च कारकम्।

कंसवधम् आचष्टे - कंसं घातयति।

बलिबन्धम् आचष्टे - बलिं बन्धयति।

राजागमनमाचष्टे - राजानमागमयति।

आङ्लोपश्च कालान्तसंयोगे मर्यादायाम् –

आरात्रि विवासम् आचष्टे - रात्रिं विवासयति

चित्रीकरणे प्रापि – उज्जयिन्या प्रस्थितो माहिष्मत्यां सूर्योद्गमनम् संभावयते - सूर्यम् उद्गमयति।

नक्षत्रयोगे ज्ञि – पुष्ययोगं जानाति - पुष्येण योजयति।

इत्थञ्चानेकेष्वर्थेषु भवत्ययं णिच्। मधुर - मधुरयति / बधिर - बधिरयति / शिथिल - शिथिलयति इत्यादिषु।

इति श्रीमत्प्राणाचार्यसुन्दरलालशुक्लस्य सुतया, श्रीजानकीदेव्या गर्भजया
पण्डितविश्वनाथत्रिपाठिनः शिष्यया, पण्डितशिवप्रसाददीक्षितस्य
च सहधर्मिण्या पुष्पादीक्षितया साक्षात्कृतया
पाणिनीयया पौष्या प्रक्रियया विरचित-
आतिदेशिको धातुपाठः

श्रीकृष्णार्पणमस्तु

xxxxxxxxxxxxxxxxxxxxxxxxxxxxxxxxxxxxxxxxxxxxxxxxxxxxxxx

डॉ. पुष्पा दीक्षिता

अध्यक्षा, पाणिनीयशोधसंस्थानम्

बिलासपुरम् (छ.ग.)

१.७.१६४२ दिनाङ्के जबलपुरनगरस्य प्रख्यातायुर्वेदचिकित्सकात् शास्त्राणां पारदृश्वनः प्राणाचार्यसुन्दरलालशुक्लाद् जानकीदेव्यां लब्धजनिः डा. पुष्पा दीक्षिता, आचार्यविश्वनाथत्रिपाठिभ्यो व्याकरणमधीत्य, मध्यप्रदेशशासनस्याथ च छत्तीसगढ़प्रदेशशासनस्य महाविद्यालयीयप्राध्यापकपदात् निवृत्ता पाणिनीयाष्टाध्यायीमाश्रित्य प्रक्रियायाः सर्वथा नवीनं कमपि क्रमम् प्रोद्घाटितवती, येन सकलाष्टाध्यायी त्रिभिर्मासैरधिगन्तुं शक्यते ।

प्रकाशितग्रन्थाः -

१. अष्टाध्यायीसहजबोधः (प्रथमः - सार्वधातुकलकाराः)
२. अष्टाध्यायीसहजबोधः (द्वितीयः - आर्धधातुकलकाराः)
३ अष्टाध्यायीसहजबोधः (तृतीयः - कृदधिकारः।
४. अष्टाध्यायीसहजबोधः (चतुर्थः - तद्धिताधिकारः)
५. इडागमः
६. शीघ्रबोधव्याकरणम्
७. पाणिनीयाष्टाध्यायीसूत्रपाठः (प्रकरणनिर्देशसमन्वितः)
८. प्रक्रियानुसारिपाणिनीयधातुपाठः
९. पाणिनीयधातुपाठः (सार्थः)
१०. अग्निशिखा (गीतिकाव्यम्)

प्रकाश्यग्रन्थाः -

११. कृदन्तरूपकोशः
१२. तिङन्तरूपकोशः
१३. परिभाषेन्दुशेखरस्य बहुतरपरिभाषाणामन्यथासिद्धिः
१४. अष्टाध्यायीसहजबोधस्यावशिष्टाश्चत्वारो भागाः
१५. नव्यसिद्धान्तकौमुदी
१६. शाम्भवी (गीतिकाव्यम्) । इत्यादीनि...

ISBN 938116013-9

9789381160138

ISBN - 978-93-81160-13-8

मूल्यम् - रू.९०/-

सनाद्यन्तधातुपाठः

संस्कृतभारती नवदेहली